CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टावक्र सटीक

जिसमें

आत्मानुभवोपदेश, आत्मानुभवोल्लास, आक्षेपद्वारोपदेश, आत्मानुभवोल्लासषट्कविवरण, अनुभवपञ्चकविवरण, बन्धमोक्षव्यवस्था, निर्वेदाष्टक, उपशमाष्टक, ज्ञानाष्टक, मेवाष्टक, यथासुखसप्तक, शांतिचतुष्क, तत्वोपदेशविंशतिक, विशेषोपदेश, तत्वज्ञस्वरूपविंशतिक, शांतिशतक, आत्माविश्रांत्यष्टक और जीवन्मुक्तचतुर्दशक प्रकरण हैं ॥

जिसको

अष्टावक्रमुनि ने श्लोकों में रचनाकिया और महात्मा विश्वेश्वरजीनेअत्यंतपरिश्रमसे टीकारचनाकियाहै॥

पहली बार

लखनऊ

मुन्शी नवलकिशोर (सी, आई, ई) के छापेखाने में छपी

फ़रवरी सन् १८९६ ई० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशायनमः

अष्टावक्र सटीक

मुक्तिमिच्छसिचेत्तातविषयान्विषवत्त्यज ॥
क्षमार्ज्जवदयातोषसत्यंपीयूषवद्भज १ ॥

श्रीमहागणाधिपतयेनमः ॥ यदज्ञानाज्जगज्ज्ञानं यद्विज्ञानाद्विलीयते ॥ तंनत्वासच्चिदानन्दं कुर्व्वेध्यात्मप्रदीपिकाम् १ इहतावदात्मानन्दानुभवपरिपूर्णीकृतानेकशिष्यव्रातः परमकारुणिकोभगवानष्टावक्रमुनिः सकलमुमुक्षुजनमुद्दिधीषुः शिष्यंप्रति मोक्षोपायमुपदिशति ॥ मुक्तिमिति ॥ तातेति सानुग्रहसम्बोधने हे शिष्य त्वं चेन्मुक्तिमिच्छसि तर्हि विषवत् विषं यथा त्यज्यते तद्वत् विषयान् शब्दस्पर्शरूपरसगन्धास्तदाश्रयांश्च त्यज । तत्रासक्तिं माकार्षीरनर्थहेतुत्वादित्यर्थः । एतेन अनर्थनिवृत्तिरूपमुक्तेरुपायउक्तः । अथ परमानन्दावाप्तिरूपं मुक्तेरुपायमाह ॥ क्षमेति ॥ क्षमानाम सर्वं सहनं सर्वाधिष्ठानत्वमात्मधर्मः । आर्जवंनाम अविद्यारूपकुहकसम्बन्धाभावः सोऽप्यात्मधर्मः । दयानाम निरुपाधिकं सर्वहितानुबन्धित्वं सोऽप्यात्मधर्मः । तोषोनामात्मसुखं तदप्यात्मस्वरूपं । सत्यं नाम कालत्रयाबाध्यस्वरूपं सोऽप्यात्मैव । एवंविधमात्मस्वरूपं पीयूषवद्भज । यथा पीयूषममृतमाश्रीयते तद्वत् क्षमार्ज्जवदयोपेतं स्वस्वरूपं कालत्रयाबध्यमात्मतत्वमाश्र यस्वेत्यर्थः । परमानन्दावाप्तिहेतुत्वादित्यर्थः १ ॥

नपृथ्वीनजलंनाग्निर्नवायुर्द्यौर्नवाभवान् ॥
एषांसाक्षिणमात्मानं चिद्रूपंविद्धिमुक्तये २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननु पांचभौतिकोदेहएवात्मा तथा च भूतानां तद्धर्म्माणां च त्यागोऽसंभावितः नहि पृथिव्यादिना स्वभावभूतोगन्धादिः काल त्रयेपि त्यज्यत इत्याशंक्य पृथिव्यादिरूपस्त्वं नभवसीत्याह ॥ न पृथ्वीति ॥ हे शिष्य पृथिव्यप्तेजोवाय्वाकाशतद्धर्मरूपस्त्वं नभव सि ततस्त्वं अनात्मधर्मान् विषयांस्त्यजेत्यर्थः । नन्वहं गौरः स्थू ल इत्यादि प्रतीतेः पांचभौतिकोदेहएवात्मेत्यत आह ॥ एषामि ति ॥ एषां देहादीनां साक्षिणमेवात्मानं विद्धि साक्षात्कुरु । तथा च देहादेः साक्षी आत्मदेहादिभ्योभिन्नः । यथाघटद्रष्टा घटाद्भिन्न इत्यर्थः ॥ नैयायकाभिमतमात्मानं निराकरोति ॥ चिद्रूपमिति ॥ आत्मज्ञानस्य फलमाह मुक्तयेति २ ॥

यदिदेहंपृथक्कृत्य चितिविश्रम्यतिष्ठसि ॥
अधुनैवसुखीशांतो बंधमुक्तोभविष्यसि ३ ॥

आत्यन्तिकी दुःखनिवृत्तिर्मुक्तिरिति नैयायकाः दुःखप्रागभाव परिपालनं मुक्तिरिति प्राभाकराः आत्महानं मुक्तिरिति बौद्धाः इ त्यादि मतानि निराकुर्वन्नेवात्मज्ञानाज्जीवन्मुक्तिदशामाह ॥ य दीति ॥ हे शिष्य यदि त्वं देहं पृथक्कृत्य देहादिभ्योविविच्य चिति विश्रम्य चिदेकाग्रोभूत्वा तिष्ठसि तर्हि त्वं अधुनैव इदानीं जीवद शायामेव सुखीप्राप्तपरमानन्दः अतएव शांतः सुप्रसन्नमनाः बन्ध मुक्तः कर्त्तृत्वभोक्तृत्वसुखानर्थरहितोभविष्यसीत्यर्थः ३ ॥

नत्वंविप्रादिकोवर्णोनाश्रमीनाक्षगोचरः ॥
असङ्गोऽसिनिराकारोविश्वसाक्षीसुखीभव ४ ॥

ननुवर्णाश्रमप्रयुक्तानिकर्म्माणि विहाय चितिविश्रम्यावस्था नं कथं युक्तमित्याशंक्यात्मावर्णाश्रमिविलक्षण इत्याह ॥ नत्व मिति ॥ त्वं वर्णाश्रमिविलक्षणइत्यर्थः । नन्वहं ब्राह्मणइत्यादि चाक्षुषप्रत्यक्षबलादात्मैव वर्णाश्रमी चेत्याशंक्याह ॥ नाक्षगोचर इति ॥ अयं ब्राह्मणइत्यादि प्रत्ययास्तु देहगोचराएव नत्वात्मगो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चरास्तस्येन्द्रियैकज्ञानागोचरत्वादित्यर्थः । तर्हि कीदृशोहमित्या शंक्यात्मानं निरूपयन्नेव तद्विश्रांतिफलमनुवदति । ससंगः सर्वो पाधिसङ्गरहितः । निराकारः विश्वसाक्षी त्वमसि अतश्चासङ्गादि रूपस्य तव वर्णाश्रमिविलक्षणत्वात्कर्म्मा सक्तिं परिहाय चिति विश्रम्यसुखी प्राप्तपरमानन्दोभवेत्यर्थः ४ ॥

धर्माधर्मौसुखंदुःखं मानसानिनतेविभो ॥
नकर्त्ताऽसिनभोक्ताऽसि मुक्तएवासिसर्वदा ५ ॥

ननु वेदोदितं कर्म विहाय चितिविश्रांत्यात्रापि प्रत्यवायप्रसं ग इत्यत आह ॥ धर्माधर्मावेति ॥ धर्माधर्मादयोमनोधर्माएव कालत्रयेपि तैः सह तव संबंधो नास्तीत्यर्थः ॥ नकर्त्तेति ॥ किंच विहितनिषिद्धकर्मकर्त्तुर्धर्मादिद्वारा सुखदुःखभोक्तृत्वं तदपि तव नास्ति शुद्धबुद्धस्वरूपत्वात् त्वंसर्वदामुक्तएव । अज्ञानमात्रविजृं भिते सुखदुःखेतितु चितिविश्रांत्यैवा ज्ञाननिवृत्त्या नजृंभिष्येते इत्यर्थः ५ ॥

एकोद्रष्टासिसर्वस्य मुक्तप्रायोसिसर्वदा ॥
अयमेवहितेबन्धो द्रष्टारंपश्यसीतरम् ६ ॥

ननुशुद्धबुद्धस्वभावस्यैकस्य नित्यमुक्तस्यात्मनोबंधः किंनिबं धनो यस्य वधनिवृत्त्यर्थं विवेकिनो यतन्तइत्याशंक्यनित्यमुक्त स्यापि प्रातीतिकबन्धहेतुमाह ॥ एकइति ॥ हे शिष्यसर्वस्यद्रष्टा प्रतिशरीरमेकस्त्वमसि ततश्च व्यापकत्वात् सर्वदा मुक्तप्रायोसि देहाध्यासवशतोबन्धे प्रतीयमानेपि वस्तुगत्या मुक्तोसीत्यर्थः ॥ अ यमिति ॥ हि निश्चितं अयमेव ते बन्धो यदितरं देहापिरूपं परि च्छिन्नं द्रष्टारं पश्यसीत्यर्थः ६ ॥

अहंकर्त्तेत्यहंमान महाकृष्णाहिदंशितः ॥
नाहंकर्त्तेतिविश्वासामृतंपीत्वासुखीभव ७ ॥

पूर्वबन्धहेतुरुक्तः । अथानर्थहेतुं वदन्नेव तन्निवृत्तिपरमानन्दा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाप्त्योरुपायमनुवदति ॥ अहंकर्त्तेति ॥ हेशिष्य अहंकर्त्तेत्येवंरूपो योहंमानः अहमिति आत्मनि कर्तृत्वाभिमानस्तद्रूपोमहान् कृष्ण सर्पः सुखदुःखविषावहस्तेन दंशितः कवलीकृतोतःकारणान्नकर्त्ता अहं अहं अकर्त्ता आत्मा इत्येवं रूपं विश्वासामृतं निश्चयामृतं पीत्वा अनुभूय सुखी भव प्राप्तपरमानंदोभवेत्यर्थः ७ ॥

एकोविशुद्धबुद्धोहमितिनिश्चयवह्निना ॥
प्रज्वाल्याज्ञानगहनं वीतशोकःसुखीभव ८ ॥

नन्वात्मज्ञानामृतपानं किंद्वारा सुखसाधनमित्याशंक्याज्ञान काननदहनद्वाराज्ञानाग्निःसुखसाधनमित्याह ॥ एकोविशुद्धबुद्धो हमिति ॥ एकः सजातीय विजातीय स्वगतभेदरहितः विशुद्धबो धः स्वप्रकाशचिदात्माहमिति निश्चयाग्निना अज्ञानाख्यं गहनं प्रज्वाल्य प्रकर्षेणदग्ध्वा मोहरागद्वेषप्रवृत्तिजन्मापायाद्वीतशोको विगतदुःखःसन्सुखी भवेत्यर्थः । ननुज्ञानेन अज्ञानदाहे सत्यपि सत्यस्य प्रपंचस्य ज्ञानादनिवृत्तेः वीतशोकः कथंस्यादित्याशंक्य प्रपंचस्यरज्जुभुजंगतुल्यत्वात् ज्ञानाद्विनिवृत्तौ दुःखहेतोरभावाद्वी तशोकता स्यादेवेत्याह ८ ॥

यत्रविश्वमिदंभाति कल्पितंरज्जुसर्प्पवत् ॥
आनन्दपरमानन्दः सबोधस्त्वंसुखंचर ९ ॥

यत्रेति ॥ यत्रबोधे इदं विश्वं रज्जुसर्प्पवत् कल्पितं अधिष्ठा नाज्ञानकल्पितं भाति सबोधश्चिदात्मात्वं सुखंचर । यथास्वप्नद शायामज्ञानकल्पितं व्याघ्रादिकं जाग्रद्बोधे विनिवर्त्यासुखं चरति तद्वदित्यर्थः । ननु दुःखहेतुप्रपंचनिवृत्तौ दुःखाभावमात्रंस्यात्सुखं तु कथं स्यादित्याशंक्य स्वभावतएवत्वं नित्यानन्दस्वरूपइत्याह आनंदेति ॥ आनंदेभ्योमनुष्यदेवभ्योकानंदेभ्यः परमउत्कृष्टआन न्दस्त्वमित्यर्थः । एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवं तीति श्रुतेः ९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुक्ताभिमानीमुक्तोहि बद्धोबद्धाभिमान्यपि ॥
किंवदन्तीहिसत्येयं यामतिःसागतिर्भवेत् १० ॥

ननु सर्वं रज्जुसर्प्पच कल्पितं स्वभावतस्त्वानन्दएवात्मेति चेत् । तर्हि बन्धमोक्षावात्मनः किंनिबंधनावित्याशंक्याह ॥ मुक्ताभिमानीति ॥ हिनिश्चितं मुक्ताभिमान्येव मुक्तः अपिच बद्धाभिमानी बद्धः अत्रकिंवदन्तीप्रमाणयति यामतिः सा गतिर्भवेत् इयं हप्रसिद्धा किंवदन्ती विद्वज्जनश्रुतिः सत्या अबाधितार्था । तं विद्याकर्म समन्वारभेतें पूर्वप्रज्ञाचेति श्रुतिपरिगृहीतत्वात् । यंयंवापि स्मरन् भावमित्यादिस्मृतिपरिगृहीतत्वाच्च । तथा चाभिमानिकावेव बन्धमोक्षौ नतु वास्तवावित्यर्थः । पूर्वमुक्तोयमर्थोदुर्बोधत्वात्पुनःपुनः शिष्यबोधार्थमुच्यत इत्यदोषः १० ॥

आत्मासाक्षीविभुःपूर्णएकोमुक्तश्चिदक्रियः ॥
असङ्गोनिस्पृहःशांतोभ्रमात्संसारवानिव ११ ॥

ननु जीवात्मनः पारमार्थिकावेव बन्धमोक्षावितितार्किकाशंकामपाकर्त्तुमाह ॥ आत्मेति ॥ आत्माभ्रमात् देहादावात्मतादात्म्य भ्रमात्संसारवानिव प्रतीयते नतु वस्तुतः संसारी अत्रदशहेतूनाह ॥ साक्षीति ॥ कर्त्तुरहंकारादेः साक्षी नतु कर्त्ता विभुः विविधं भवत्यस्मादिति विभुः सर्वाधिष्ठानं । पूर्णः व्यापकः । एकः स्वजातीयविजातीयस्वगतभेदरहितः । मुक्तः वस्तुगत्या मायातत्कार्यातीतः चित्स्वकाशचैतन्यरूपः । अक्रियः चेष्टारहितः असङ्गः सर्वबन्धशून्यः असङ्गोह्ययं पुरुष इतिश्रुतेः निस्पृहः विषयाभिलाषरहितः प्रवृत्तिनिवृत्तिदेहाद्यंतःकरणधर्मरहितस्तस्माद्वस्तुतो न बन्धवानित्यर्थः ११ ॥

कूटस्थंबोधमद्वैतमात्मानं परिभावय ॥
आभासोहंभ्रमंमुक्त्वा भावंबाह्यमवान्तरम् १२ ॥

अहं परिच्छिन्नो ममेदं देहादिकं सुखी दुःखी चाहमिति भ्रम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यानादिपरम्परागतस्य सकृद्भावनया निवर्तयितुमशक्यत्वादावृत्तिरसकृदुपदेशादिति व्याससूत्राच्च पुनः पुनरद्वैतात्मभावनां विजातीयभावनानिवृत्तिपुरस्सरामुपदिशति ॥ कूटस्थमिति ॥ हे शिष्य आभासोहं अहंकारोहमिति भ्रमं मुक्त्वा वाह्यभावं मम देहादिकमिति वाह्यपदार्थविषयं भावंआवांतरं भावं सुखी दुःखी मूढोहमिति अंतरपदार्थविषयं भावं भावनां मुक्त्वा अकृत्वा कूटस्थमसंगं बोधस्वरूपमद्वैतमात्मानं परिसमंतात् व्यापकं भावयेत्यर्थः १२ ॥

देहाभिमानपाशेन चिरं बद्धोसिपुत्रक ॥
बोधोहंज्ञानखड्गेन तन्निकृत्यसुखीभव १३ ॥

अनादिश्यं देहाभिमानः सकृद्भावनया न निवर्त्तत इति पुनः पुनर्ज्ञानखड्गेन तं निवर्त्य सुखी भवेत्याह ॥ देहाभिमानेति ॥ हे पुत्रक शिष्य त्वं देहे अहमित्यभिमानपाशेन चिरंबहु कल्पं बद्धोसि । अतो बोधोहं चिद्रूपोह मिति ज्ञानखड्गेन पुनः पुनस्तं पाशं निकृत्य नितरांछित्त्वा सुखी भव १३ ॥

निःसंगोनिःक्रियोसित्वं स्वप्रकाशोनिरंजनः ॥
अयमेवहितेबन्धः समाधिमनुतिष्ठसि १४ ॥

चित्तवृत्तिनिरोधरूपः समाधिरेव केवलो बन्धनिवृत्तिहेतुरिति पातंजलमतमपाकर्त्तुमाह ॥ निःसंगइति ॥ हे शिष्य त्वं वस्तुतो निस्संगः सर्वसम्बन्धशून्योसि । तथा क्रियारहितोसि । अत्र हेतुमाह ॥ स्वप्रकाशो निरंजन इति ॥ अक्रियस्य समाध्यनुष्ठानं यत् अयमेव हि निश्चितंबन्धः । तथाच ज्ञानातिरिक्तोपायानुष्ठानमात्रं प्रत्युत बन्ध एवेत्यर्थः १४ ॥

त्वयाव्याप्तमिदंविश्वं त्वयिप्रोतंयथार्थतः ॥
शुद्धबुद्धस्वरूपस्त्वं मागमःक्षुद्रचित्तताम् १५ ॥

तदेवानात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः । अथ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परिपूर्णे शुद्धबुद्धात्मनि विपरीतधियमुत्सारयन्नेव चिन्निष्ठामुपसं हरति श्लोकद्वयेन ॥ त्वयेति ॥ हे शिष्य इदं विश्वं त्वया व्याप्तं कनकेनेव कटककुण्डलादिकं। तथा इदं विश्वं त्वयि प्रोतं मृदीव घट शरावादिकं। हे शिष्य त्वं यथार्थतः परमार्थतः शुद्धः अविद्या तत्कार्यपंकासितः बुद्धः स्वप्रकाशचिद्रूपोसि एवं च सर्वगन्धः स र्वरसो नेतिनेतीति श्रुतिद्वयानुसारेणोक्ताभ्यामध्यारोपापवादाभ्यां निष्प्रपंच प्रपंचितमात्मतत्वमुपदिष्टंभवति। हे शिष्य परिपूर्णशु द्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां विपरीतवृत्तिं मागमः माकार्षी रित्यर्थः १५ ॥

निरपेक्षोनिर्विकारो निर्भरःशीतलाशयः ॥
अगाधबुद्धिरक्षुब्धो भवचिन्मात्रवासनः १६

प्रतीयमानाः षडुर्मयः षड्भावविकारा न त्वद्गतास्त्वंतु तद्विल क्षणइत्याह ॥ निरपेक्षइति ॥ हे शिष्यत्वंनिरपेक्षः अशनपिपा सादिषडुर्मिसंसर्गातीतः। तथा निर्विकारः। जायतेऽस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवं विधायास्कादिभिः प्रोक्ताः षड्भावविकारास्तत्संसर्गरहितस्त्वमित्यर्थः। तर्हिकीदृशोहमित्य तआह ॥ निर्भरइति ॥ निर्भरश्चिद्घनरूपः शीतलः सुखरूपः आ मुक्तिसेमयमभिव्याप्य शेते तिष्ठतीत्याशयः अगाधा अनलस्पर्शा अपरिच्छिन्नाबुद्धिः स्वरूपचैतन्यंतद्रूपः। अक्षुब्धः अविद्याकृतक्षो भरहितस्त्वंवस्तुतोसि। अतस्त्वंक्रियामात्ररहितश्चिन्मात्रनिष्ठो भवेत्यर्थः १६ ॥

साकारमनृतंविद्धिनिराकारंतुनिश्चलम् ॥
एतत्तत्वोपदेशेन नपुनर्भवसम्भवः १७ ॥

विषयान् विषवत् त्यज सत्यं पीयूषवद्भजेति मोक्षोपायः प्रथ मश्लोके उपदिष्टः परन्तु विषयाणांविषतुल्यत्वे सत्यात्मनः पीयू षतुल्यत्वेच हेतुर्नोक्तोतस्तत्र हेतुं वदन्नेव षोडशश्लोकोपदेशोमो क्षहेतुश्चिदात्मात्र स्वाध्यस्तं विश्वसमन्ततो व्याप्यावस्थितो मु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुरइव स्वाध्यस्तं शरीरं इति तद्भावापत्तिरेव परमपुरुषार्थइत्युप पत्तिमुखेन प्रकरणार्थं संगृह्णाति श्लोकत्रयेण ॥ अथासंग्रहश्लो काः ॥ साकारमित्यादिना ॥ हेशिष्य साकारं शरीरादिकं अनृतं मिथ्याभूतं विद्धि अतस्तद्विषवत् त्यजेत्यर्थः । निराकारमात्मतत्वं निश्चलं कालत्रयावस्थायि विद्धि सर्वसाक्षित्वान्नित्यं विज्ञानमा नन्दं ब्रह्मेति श्रुतेश्च अतत्तत्वे चिन्मात्रे उपदेशेन उपदिश्यमाने न तत्रैव विश्रम्यावस्थानेन पुनर्भवस्यमोक्षस्य सम्भवः सिद्धिरि त्यर्थः१७॥

यथैवादर्शमध्यस्थे रूपेतःपरितस्तुसः ॥
तथैवास्मिन्शरीरेन्तःपरितःपरमेश्वर १८ ॥

अथ वर्णाश्रमधर्मकस्थूलशरीरात्पुण्यापुण्यधर्मकन्निराशरीरा द्विलक्षणपरिपूर्णं चैतन्यं सदृष्टांतं निरूपयति ॥ यथैवेति ॥ यथैवा दर्शप्रतिबिम्बिते शरीरादौ अन्तर्मध्ये परितोबहिश्च सआदर्शो व्या प्य वर्त्तते । तथैव स्वाध्यस्ते अस्मिन् स्थूले शरीरे अन्तः परितश्च परमेश्वरश्चिदात्मा व्याप्यस्थितः । तथाच । यत्रविश्वमिदंभाति कल्पितंरज्जुसर्पवदित्यादिःसर्वोपिप्रकरणार्थःसंक्षेपत सूचितः१८

एकंसर्वगतंव्योम बहिरन्तर्यथाघटे ॥
नित्यंनिरन्तरंब्रह्म सर्वभूतगणेतथा १९ ॥
इत्युपदेशः ॥

आदर्शदृष्टांते परिच्छिन्नत्वादिभ्रमापत्तिः स्वाध्यस्तशरीरांतर्व र्तित्वं न स्पष्टमतो घटाकाशदृष्टांतेन बाह्याभ्यंतरव्यापकत्वमाह ॥ एवं सर्वगतमिति ॥ यथा सर्वगतमेकं नित्यं व्योमघटे घटादौ ब हिरन्तश्च वर्तते तथा नित्यं अविनाशि ब्रह्म सर्वभूतगणे बहिरं तश्च निरंतरं सर्वदा वर्ततइत्यर्थः । एष त आत्मा सर्वस्यांतरइ ति श्रुतेः । अतश्च बोधोहमिति ज्ञानखड्गेन देहाहंभावपाशं नि कृत्य सुखी भवेत्यर्थः १९ ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकाया
मात्मानुभवोपदेशप्रकरणम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहोनिरंजनःशान्तो बोधोहंप्रकृतेःपरः ॥
एतावंतमहंकालं मोहेनैव विडंबितः १ ॥

इत्थंगुरूक्तिपीयूषास्वादानुभवमात्मनः ॥ आविश्चकार साश्चर्यं शिष्योनिजगुरुं प्रति ॥ तत्र तावत् शिष्यश्चिद्रूपात्मानुभवमाविष्कुर्वन्नेव गुरुकृतोपकारख्यापनाय प्राचीनसंस्कारवशात् बाधितानुवृत्त्या प्राचीनस्य मोहविडम्बनस्य स्मरणमाविष्करोति॥ अहो इति ॥ अदृष्टस्याद्भुतस्यानुभवादहो इत्याश्चर्ये अहं निरंजनः सर्वोपाधिविनिर्मुक्तः शान्तः सर्वविकारातीतः प्रकृतेःपरोमायांधकारस्पर्शशून्यो बोधः स्वप्रकाशःचिद्रूपइत्यर्थः गुरूपकारख्यापनाय मोहविडम्बनमनुस्मरति ॥ एतावन्तमिति ॥ एतावंतं गुरूपदेशावधिकं कालंअहं मोहेन देहात्माविवेकेन बिडम्बित एव । सांप्रतंतु श्रीगुरुप्रसादादवाप्तानुभवोस्मीति विवक्षितोर्थः १ ॥

यथाप्रकाशयाम्येको देहमेनंतथाजगत् ॥
अतोममजगत्सर्वमथवाचनकिंचन २ ॥

पूर्वकालीनं मोहविडम्बनमुक्तं । संप्रति तु गुरुप्रसादान्मम देहात्मविवेकोस्तीति सोपपत्तिकमाह ॥ यथेति ॥ अहं यथा जगत्प्रकाशयामि तथैव एनं स्थूलं देहं प्रकाशयामि । तथाच देहोनात्माप्रकाश्यत्वाज्जगद्वदित्यर्थः । कस्तर्हि जगदादिदेहात्मनोः संबंध इत्याशंक्य युक्तिविचारादाध्यासिकः संबंधः परमार्थगत्याच न कश्चित्संबंधः यथा सुवर्णकुण्डलादेः इत्याह ॥ अतोममेति ॥ अतोदृश्यत्वात्सर्वदेहप्रमुखं जगत् मम मदीयं मय्यध्यस्तमित्यर्थः । चोवधारणे । अथवा परमार्थविचारे किंचन किमपि दोहदिकं मम न च नैव मय्यध्यस्तमित्यर्थः । तदेव मध्यारोपापवादाभ्यां प्रकृतेःपरो बोधोहमित्येवात्र स्फुटीकृतं २ ॥

सशरीरमहोविश्वं परित्यज्यमयाधुना ॥
कुतश्चित्कौशलादेव परमात्माविलोक्यते ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननु लिंगदेहात् कारणदेहाच्च विवेकाभावे कथं प्रकृत्यतिरिक्तात्मबोध इत्याशंक्य ततोपि विवेकजमात्मानुभवमाह ॥ सशरीरमिति ॥ अहो इत्याश्चर्ये सशरीरं लिंगशरीरकारणशरीरसहितं विश्वं परित्यज्य विचारतः पृथक् सत्ताया निषिध्य कुतश्चित् शास्त्राचार्योपदेशलक्षणात् कौशलाच्चातुर्य्यादेव परमश्रेष्ठ आत्मा मयाविलोक्यते नान्यः परमात्मविलोकनोपायरित्यर्थः ३ ॥

यथानतोयतोभिन्नास्तरङ्गाःफेनबुद्बुदाः ॥
आत्मानोनतथाभिन्नं विश्वमात्मविनिर्गतम् ४ ॥

सशरीरविश्वस्य पृथक्सत्तया परित्यजनं सदृष्टान्तं निरूपयति ॥ तथा न तोयत इति ॥ यथा तरङ्गाः फेनबुद्बुदाश्च न तोयतोभिन्नास्तदुपादानत्वात् तथा आत्मविनिर्गतं आत्मनः संजातं आत्मोपादानकं विश्वं आत्मनो न भिन्नं । एवंचेत्तोयतरंगादिषु जलं यथा स्वच्छमनुगतं तथा स्वच्छचिद्रूपोहं विश्वस्मिन्नाधिष्ठानभूतो न मत्तोऽन्याद्विश्वमित्यर्थः ४ ॥

तंतुमात्रोभवेदेव पटोयद्वद्विचारितः ॥
आत्मतन्मात्रमेवेदं तद्वद्विश्वंविचारितम् ५ ॥

दृष्टांतांतरेणात्मरूपतया सर्वावलोकनं निरूपयति ॥ तंतुमात्रइति ॥ स्थूलदृष्टांतं तु वैलक्षण्येन प्रतीयमानोऽपिपटो विचारितः विचारंवीक्षितः सन्यद्वत् यथा तंतुमात्रो भवेत् अस्ति तद्वत् तथा इदं स्थूलदृष्ट्या ब्रह्मवैलक्षण्येनापि प्रतीयमानं विश्वं युक्त्या विचारितं सत् आत्मतन्मात्रमेव आत्मसत्तामात्रात्मकमेव एतेन तंतुः स्वसत्तया पटे अनुगतस्तथात्मापि स्वसत्तया अधिष्ठानभूतो विश्वस्मिन्ननुगत इत्यर्थः ५ ॥

यथैवेक्षुरसेक्लृप्ता तेनव्याप्तैवशर्करा ॥
तथाविश्वंमयिक्लृप्तं मयाव्याप्तंनिरंतरम् ६ ॥

आत्मनैव सर्वं व्याप्तमित्यत्रदृष्टांतांतरमाह ॥ यथैवेति ॥ य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

थैव इक्षुरसे कृप्ता अध्यस्ता शर्करा तेन मधुररसेन व्याप्तैव सर्वा पिव्याप्ता तथैव मयिनित्यानन्दस्वरूपे कृप्तमध्यस्तं विश्वं मया नित्यानन्देन निरंतरं बाह्याभ्यंतरं व्याप्तं तस्माद्विश्वमानंदात्म स्वरूपमेवेत्यर्थः ॥ तदेवमस्तिभाति प्रियमित्येवंरूपेणाहमेवसर्व त्रावस्थित इति श्लोकत्रयविवक्षितोर्थः ६ ॥

आत्माज्ञानाज्जगद्भाति आत्मज्ञानान्नभासते ॥
रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासतेनहि ७ ॥

विश्वंचेदात्मनो न भिन्नं तर्हि केनकारणेनेदं भासते केनच कारणेननभासतइत्याशंक्याह ॥ आत्माज्ञानादिति ॥ आत्मनः अज्ञानात् जगद्भाति । तथा आत्मनः अधिष्ठानस्य ज्ञानान्नभासते अधिष्ठानाज्ञानादन्यस्यभानेधिष्ठानज्ञानाच्चाज्ञाने लोकप्रसिद्धंदृष्टान्तमाह ॥ रज्ज्वज्ञानादिति ॥ हि यथा रज्जुस्वरूपस्याज्ञानात् अहिः सर्पोभाति तत् ज्ञानाद्रज्जुज्ञानान्नभासते ७ ॥

प्रकाशोमेनिजंरूपं नातिरिक्तोस्म्यहंततः ॥
यदाप्रकाशतेविश्वं तदाहंभासएवहि ८ ॥

ननु आत्मनः अज्ञानेसतिआत्मप्रकाशा भावाज्जगत्कथं भासत इत्याशंक्य स्वरूपचैतन्यबलादेवेत्याह ॥ प्रकाशइति ॥ प्रकाशोनित्यबोधः मे ममनिजं स्वाभाविकं स्वरूपं ॥ अहं ततः प्रकाशात् अतिरिक्तः भिन्नोनास्मि । अतोममयदाविश्वं प्रकाशते तदा अहं भासः मदात्मकप्रकाशादेव भासते । स्वरूपचैतन्यं चेद्भासकं तदा कथमज्ञानमिति चेत् मैवं । नहि स्वरूपचैतन्यं अज्ञानविरोधि किंत्वज्ञानसाधकमेव । अन्यथाजडस्य सिद्धिरेव न स्यात् । किंचात्मस्वरूपप्रकाशाभावे स्वात्मनोप्यज्ञत्वप्रसक्तिर्जगदांध्यप्रसंगश्च । तस्माद्यदा विश्वं प्रकाशते तदात्मस्वरूपप्रकाशादेवेति भावः ८ ॥

अहोविकल्पितंविश्वमज्ञानान्मयिभासते ॥
रूप्यंशुक्तौफणीरज्जौवारिसूर्यकरेयथा ९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वप्रकाशेप्यामनि अज्ञानवशाद्विश्वंभासते इति महदाश्चर्यं सदृष्टान्तमाह ॥ अहोइति ॥ स्वप्रकाशेपि मयि अज्ञानाद्विकल्पितं रचितमध्यस्तं विश्वं भासते अहो आश्चर्यमिदं । यथा शुक्त्या दौरूप्यादिकं भासते तद्वदित्यर्थः ९ ॥

मतोविनिर्गतंविश्वं मय्येवलयमेष्यति ॥
मृदिकुंभौजलेवीचिः कनकेकटकंयथा १० ॥

ननु मायायाविकारित्वात् तत्रैव विश्वमुत्पद्यते तत्रैव च लयमेति नतु चैतन्यात्मनीति सांख्यमतमपाकर्तुमाह ॥ मतोविनिर्गतमिति ॥ इदं विश्वं मतएव विनिर्गतं मय्येव लयमेष्यति। तथा मृदादौ कुंभादिस्तद्वदित्यर्थः । नचात्रप्रमाणाभावइति शंकनीयं । यतो वा इमानि भूतानि जायंते येन जातानि जीवन्ति यत्प्रयंत्यभि संविशंतीति श्रुतेः १० ॥

अहोअहंनमोमह्यं विनाशोयस्यनास्तिमे ॥
ब्रह्मादिस्तम्बपर्यंतं जगन्नाशेपितिष्ठतः ११ ॥

ननु ब्रह्माचेज्जगदुपादानकारणं तर्हि तस्य विकारित्वान्मृदादिवद्विनाशित्वापत्तिरित्याशंक्याह ॥ अहोअहमिति ॥ अहो आश्चर्यरूपोहं यस्य मम सर्वोपादानभूतस्यापि विनाशो नास्ति नचो पादानत्वे सुवर्णादिवद्विनाशित्वापत्तिः सुवर्णादिवद्विकारित्वाऽनंगीकारात् । विवर्त्ताधिष्ठानत्वेनैवोपादानत्वस्वीकारात् । अतएवाशेषकार्योपादानत्वादविनाशिने सर्वोत्कृष्टायमह्यं नमः ब्रह्मादिदेवताच प्रलयेविनाशशंकां निराकरोति ॥ ब्रह्मादीति ॥ ब्रह्मादिस्तम्बपर्यंतं यत् जगत् तस्य नाशेपि तिष्ठतः । प्रलयेपि स्थितिमतो यस्य मे नाशो नास्तीत्यर्थः । सत्यंज्ञानमनंतं ब्रह्मेति श्रुतेः ११ ॥

अहोअहंनमोमह्यमेकोहंदेहवानपि ॥
क्वचिन्नगंतानागंताव्याप्यविश्वमवस्थितः १२ ॥

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नन्वात्मा सुखदुःखावच्छेदकदेहवत्वान्नाना तथाहकारणरूप त्वात्तत्तद्देशगमनागमनवानित्याशंक्याह ॥ अहोअहमिति ॥ अ होआश्चर्यरूपोहं। आश्चर्यरूपायमह्यंनमः। आश्चर्यरूपमेवाह ॥ एकोहमिति ॥ नानासुखदुःखावच्छेदकदेहवानप्यहमेकएव। य था नानासकम्पनिष्कम्पत्वाव च्छेदकजलोपाधिवानपि भानु रेकएवेत्यर्थः ॥ क्वचिदिति ॥ विश्वंव्याप्यास्थितः परिच्छिन्नाहंका रविलक्षणोहं क्वचिदपि न गन्ता कुतोपिनागन्ताचेत्यर्थः १२ ॥

अहोअहंनमोमह्यं दक्षोनास्तीतिमत्समः ॥
असंस्पृश्यशरीरेण येनविश्वंचिरंधृतम् १३ ॥

नन्वात्मानानिःसंगः शरीरसंसर्गितया जगद्धिधारकत्वादित्या शंक्याह ॥ अहोअहमिति ॥ प्रथमपादार्थः पूर्ववत्। इति कार णात्समोदक्षः असंभाव्य कार्यविधानचतुरः कोपिनास्ति येन हेतुना शरीरेण असंस्पृश्य घृतपिण्डेनोल्मुकवदसंबध्यैव चिरं बहुकालं विश्वं स्थावरजंगमं मयाधृतम् १३ ॥

अहोअहंनमोमह्यं यस्यनास्तीहकिंचन ॥
अथवायस्यमेसर्वंयद्वाङ्मनसगोचरम् १४ ॥

नन्वसम्बद्धस्य न जगद्धिधारकत्वं। संबद्धस्यैव भित्यादेर्गृहा दिधारकत्वादित्याशंक्याह ॥ अहोअहमिति ॥ अहो आश्चर्यरू पोहं तस्मैमेनमः यस्य मे सम्बन्धिपरमार्थगत्या किंचन किम पि नास्ति परमार्थतो द्वितीयस्यैवाभावात् अथवा यत् यावद्वाङ् मनसगोचरं तावत्सर्वं यस्य मे ममसम्बन्धिमिथ्यातादात्म्यसं बन्धः सुवर्णे कुण्डलादिवदित्यर्थः ॥ अतएव सर्वसम्बन्धित्वाऽस र्वसम्बन्धित्वाभ्यामाश्चर्यरूपाय मह्यन्नमइत्यर्थः १४ ॥

ज्ञानंज्ञेयंतथाज्ञातात्रितयंनास्तिवास्तवम् ॥
अज्ञानाद्भातियत्रेदंसोहमस्मिनिरंजनः १५ ॥

ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात्कथंमिथ्या तादा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्म्यसंबंधो जगदात्मनोरित्याशंक्याह ॥ ज्ञानं ज्ञेयमिति॥ ज्ञानंज्ञेयं तथा ज्ञाता इत्यादिकं त्रितयं त्रिपुटीरूपं सर्वं वास्तवं पारमार्थिकं नास्ति । यत्र मयि इदं त्रितयं अज्ञानादनिर्वचनीया ज्ञानान्मिथ्यातादात्म्येनाध्यस्तं भाति । अतएव वस्तुगत्याहं निरंजनः । प्रपंचमलसम्बन्धशून्योस्मीत्यर्थः १५ ॥

द्वैतमुक्तमहोदुःखंनान्यत्तस्यास्तिभेषजम् ॥
दृश्यमेतन्मृषासर्वमेकोहंचिद्रसोमलः १६ ॥

ननु निरंजनस्य कथं दुःखसम्बन्ध इत्याशंक्य द्वैतभ्रांतिमुक्तकएवासौ नतु वास्तवइत्याह ॥ द्वैतमुक्तमिति ॥ अहो आश्चर्ये निरंजनस्याप्यात्मनः द्वैतमुक्तं दुःखं द्वैतभ्रमात् क्षोभको दुःखाध्यासो नतु वास्तवं दुःखमित्यर्थः । दुःखाध्यासमहाव्याधेः किंभेषजमित्याशंक्याह ॥ नान्यदिति ॥ अमलो माया तत्कार्यातीतश्चिद्रसश्चिन्मात्रस्वरूपएकोहं एतत्प्रतीयमानं सर्वं दृश्यं जडजातं मृषामिथ्याभूतमपारमार्थिकमिति बोधादन्यत्तस्यत्रिविधदुःखव्याधेर्भेषजंनास्तीत्यर्थः १६ ॥

बोधमात्रोहमज्ञानादुपाधिःकल्पितोमया ॥
एवंविमृशतोनित्यं निर्विकल्पेस्थितिर्मम १७ ॥

नन्वयं द्वैतप्रपंचाध्यासः किं निमित्तः किमुपादानकइत्याशंक्याह ॥ बोधेति ॥ बोधमात्रश्चिदेकस्वरूपोहमेव पारमार्थिकः । मया सर्वोपादानभूतेन कर्त्राऽज्ञानादखण्डाऽज्ञानरूपान्निमित्ताद्दहंकारप्रमुखउपाधिर्द्वैतप्रपंचः कल्पितः । एवं विचारस्यफलमाह ॥ एवमिति ॥ एवं नित्यं विमृशतो विचारयतो मम निर्विकल्पे निरस्तद्वैते स्वरूपचैतन्ये स्थितिःप्राप्तिर्जाता १७ ॥

अहोमयिस्थितंविश्वं वस्तुतोनमयिस्थितम् ॥
नमेबन्धोस्तिमोक्षोवाभ्रान्तिःशान्तानिराश्रया १८ ॥

ननु स्वरूपचैतन्यप्राप्तिरूपामुक्तिःप्रागुक्तविचारजन्या चेत्तदा मुक्तेर्विनाशापत्तिः । जन्यभावस्य विनाशित्वनियमात् । वि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाराजन्याचे तदा विचाररहितानामपि मोक्षापत्तिरित्याशंक्या ह ॥ अहो इति वस्तुतो मे मम बन्धोनास्ति नच मोक्षोप्यस्ति नित्य चिद्रूपत्वात् । तर्हिशास्त्रविचारस्य किंफलमित्याशंक्य भ्रांतिनिवृत्तिरेव तत्फलमित्याह ॥ अहोमयि इति ॥ अहो आश्चर्ये मयिस्थितमपि विश्वं वस्तुतः कालत्रयेपि मयिनास्थितमिति विचारणे भ्रान्तिरेव शान्ता नतु परमानन्दावाप्तिर्जनिता आत्मनः सर्वदा परमानन्दरूपत्वात् । कीदृशी भ्रांतिर्निराश्रया । उक्त विचाराज्ञानस्य नष्टत्वान्निर्मुक्तेत्यर्थः १८ ॥

सशरीरमिदंविश्वं नाकिंचिदितिनिश्चितम् ॥
शुद्धचिन्मात्र आत्माच तत्कस्मिन्कल्पनाधुना १९॥

नन्वधिष्ठानस्योपादानस्य सत्वात् मुक्तेष्वपि प्रपंचोदयः स्यादित्याशंक्याह ॥ सशरीरमिति ॥ शरीरसहितमिदं विश्वं न किंचित् न सत्यं नाप्यसत्यमिति निश्चितं नेह नानास्ति किंचनेति श्रुतेः आत्माच चिन्मात्रःशुद्धः मायामलशून्यः तत्तस्मात्कारणात् अधुनाऽज्ञाननिवृत्तौ सत्यांकस्मिन् अधिष्ठाने विश्वकल्पनास्यात् नकस्मिन्नपीत्यर्थः ॥ ननुसर्वस्यप्रपंचस्यावास्तवत्वेवर्णजात्याश्रमशरीरमप्यवास्तवमेवेति शरीरविशेषमाधिकृत्य प्रवर्त्तमानं विधिनिषेधशास्त्रमपि अवास्तवंस्यात् तथाच तद्बोधितस्वर्गनरकयोरप्यवास्तवत्वात्स्वर्गादावनुरागो नरकादिभ्यश्चभयंनस्यात् । किंचशास्त्रबोध्यौबंधमोक्षावपि वास्तवौ न स्यातामित्याशंक्यो शापसापरिहरति ॥ शरीरमिति ॥ शरीरादिकमेतत्कल्पनामात्रमेव । चिदात्मनः सच्चिदानंदरूपस्य ममएतैः शरीरादिभिर्नाकिमपिकार्यसाध्यं । विधिनिषेधादिकंतु अविद्यावंतमेवाधिकृत्यप्रमाणमित्यर्थः १९ ॥

शरीरंस्वर्गनरकौ बंधमोक्षौभयंतथा ॥
कल्पनामात्रमेवैतत्किंमेकार्यंचिदात्मनः २०

स्वर्गादिभिः किंमेकार्यमिति प्रागुक्तंअथेहलोकेनापि मेकार्यंना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्ती याह ॥ अहोजनेति ॥ न द्वैतं अद्वैतं पश्यतो मम अहो इत्या श्चर्ये जनसमूहेपि अरण्यमिव संवृत्तं संजातं तस्मात् अहं मिथ्यात्वे क्वरतिं प्रीतिं करवाणि न क्वापि इत्यर्थः २० ॥

अहोजनसमूहेपिनद्वैतंपश्यतोमम ॥ अरण्यमिवसंवृत्तंक्वरतिंकरवाण्यहम् २१ ॥

ननु शरीरस्याहं ममतास्पदतयानुरागविषयत्वा आहंकारस्याप्यहंतास्पदतयानुरागविषयत्वात् तत्रस्पृहास्यादित्याशंक्याह २१॥

नाहंदेहोनमेदेहो जीवोनाहमहंहिचित् ॥ अयमेवहिमेबंध आसीद्यज्जीवितेस्पृहम् २२ ॥

नाहमिति ॥ देहोहं न जडत्वात् नापि मे देहः ममनिःसंगत्वात् । जीवोऽहंकारोनाहं कर्तृत्वात् आत्मनश्चाकर्तृत्वात् । कस्तर्हि त्वमित्याशंक्याह ॥ अहंहिचिदिति चिःस्वरूपएवाहमित्यर्थःकुतस्तर्हि विवेकिनामपिजीविते स्पृहेत्याशंक्याह अयमेवहीति ॥ यज्जीवितेस्पृहा अयमेवमेबन्धः प्रागासीत् । जीवनार्थेहि पुमान् सुवर्णहरणादिकमपि करोतीति जीवितेच्छाबन्धः बंधहेतुत्वात् । इदानीं तु सच्चिदानन्दानुभवशालिनो ममासंगस्य प्राणानुषंगबन्धनरूपे जीवितेपि स्पृहानास्तीत्यर्थः २२ ॥

अहोभुवनकल्लोलैर्विचित्रैर्द्राक्समुत्थितम् ॥ मय्यनन्तमहांभोधौचित्तवातेसमुद्यते २३ ॥

अथस्वस्यसर्वाधिष्ठानत्वंपश्यन्नाह ॥ अहो इति ॥ अहो इत्याश्चर्ये अनन्तमहांभोधौ मयि चित्तवाते समुद्यते समुत्पन्ने सति विचित्रैर्नानाविधैर्भुवनरूपैः कल्लोलैर्द्राक् अत्यर्थं समुच्छितं उदयो लब्धः । तथा वारिधेस्तरंगा इव मत्तो भुवनानि वस्तुतो न भिन्नानीत्यर्थः २३ ॥

मय्यनन्तमहांभोधौचित्तवातेप्रशाम्यति ॥ अभाग्याज्जीववणिजोजगत्पोतोविनश्वरः २४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रारब्धक्षयदशामनुवदति ॥ मयि इति ॥ अनन्त महांभोधौ सर्वव्यापकचित्समुद्रे मयि चित्तवाते संकल्पविकल्पानि मनोमारुते प्रशाम्यति सति संकल्पादिरहिते सति जीववाणिजो जीवात्मलक्षणस्य वाणिज्यकर्तुः अभाग्यात् प्रारब्धक्षयात् जगत्पोतः शरीरादिनौकासमूहः विनाशशीलः विनाशवान् भवतीत्यर्थः २४ ॥

मय्यनंतमहांभोधावाश्चर्यंजीववीचयः ॥ उद्यन्तिघ्नन्तिखेलन्तिप्रविशन्तिस्वभावतः २५ ॥

इतिश्रीमदष्टावक्रप्रकरणेशिष्यप्रोक्तं स्वात्मानुभवोल्लासपंचविंशतिसमाप्तम् २५ ॥

अथ व्याधितानुवृत्त्या स्वस्मिन्सर्वजीवव्यवहारं पश्यन्नाह ॥ मयीति ॥ आश्चर्यविष्क्रिये निर्विकारेमयि अनन्तमहांभोधौ जीववीचयस्तरंगा उद्यन्ति अभिव्यक्ता भवन्तीव मिथः परस्परं घ्नंति ताडयंतीव शत्रुभावाध्यासात । अन्येच मिथः खेलंतीव मित्रभावाद्यध्यासात् अविद्याकामकर्मक्षयेसतिच मयि विशंतीव कस्मात्स्वभावतः अविद्याकामकर्मस्वभाववशात् उत्पत्त्यादिकं प्राप्नुवंति । स्वभावतः स्वस्य चिद्रूपस्य अंशरूपेण भावतस्तत्रैव प्रविशंति घटाकाशादय इव महाकाश इति विवेकः २५ द्वितीयेस्मिन्प्रकरणे शिष्येणानुभवस्थितिः । निवेदितागुरोस्तुष्ट्यै ब्रह्माश्चर्यपुरस्सरा ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्येणोक्तमात्मानुभवोल्लासप्रकरणम् ॥

अविनाशिनमात्मानमेकंविज्ञायतत्त्वतः ॥ तवात्मज्ञस्यधीरस्यकथमर्थार्जनेरतिः १ ॥

शिष्यानुभवपीयूषे ज्ञातेपि करुणावशात् । तद्विज्ञानपरीक्षार्थं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिष्यमाहगुरुः पुनः ॥ विज्ञातानुभवमपि शिष्यं व्यवहारास्थितं दृष्ट्वा तद्विज्ञानपरीक्षार्थं तद्व्यवहारास्थितिमाक्षिप्यात्मानुभवशालिनीस्थितिमुपदिशति ॥ अविनाशिनमिति ॥ हे शिष्य अविनाशिनं त्रैकालिकसत्ताशालिनं कालतो व्यवच्छेदशून्यं आत्मानं देशतो व्यवच्छेदशून्यं एकं वस्तुतो व्यवच्छेदशून्यं चित्स्वरूपं विज्ञाय निदिध्यास्य तत्त्वतः आत्मज्ञस्य अतएव धीरस्य तव अर्थार्जने व्यावहारिकार्थसंग्रहे कथंरतिः प्रीतिर्लक्ष्यते इत्याक्षेपः ननु ज्ञाने सति विषयसंग्रहः कथमनुपपन्न इत्याशंक्य विषयप्रीतेरात्माज्ञानमूलकत्वं सदृष्टांतं सोपपत्तिकमाह १ ॥

आत्माज्ञानादहोप्रीतिर्विषयभ्रमगोचरे ॥ शुक्तेरज्ञानतोलोभोयथारजतविभ्रमे २ ॥

आत्माज्ञानादिति ॥ अहो इति संबोधने हे शिष्य विषयभ्रमगोचरे विषये या प्रीतिः सा आत्माज्ञानादेव भवति नतु ज्ञानात् तद्व्यतिरिक्तविषयाणां बाधादिति भावः अत्र लोकप्रसिद्धं दृष्टांतमाह ॥ शुक्तेरिति ॥ यथा रजतविभ्रमेसति शुक्तेरज्ञानतोलोभः पामराणामप्यनुभवसाक्षिकइत्यर्थः विषयभ्रमगोचर इत्यत्र विशेष्यस्यापिपूर्वनिपातो विशेषणं विशेष्येण बहुलमित्यत्र बहुलग्रहणादाम्रवृक्षवत् २ ॥

विश्वंस्फुरतियत्रेदंतरंगाइवसागरे ॥ सोहमस्मीतिविज्ञायकिंदीनइवधावसि ३ ॥

अज्ञानमूलाविषयप्रीतिरितिप्रागुक्तं । अथसर्वाध्यस्ताधिष्ठानतयात्मनिज्ञाते सति विषयेषु न पुनः प्रीतिसंभवइत्याह ॥ विश्वं स्फुरति इति सागरे तरंगाइव यथा पृथक् सत्तारहितास्तद्वत् यत्रेदं विश्वं पृथक्सत्तारहितं स्फुरति सतत्पदार्थोहमस्मीति विज्ञाय साक्षात्कृत्य दीन इव ममेदं भवत्विति तृष्णाकुलइव किंधावसि कचधावसि इत्याक्षेपः ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रुत्वापिशुद्धचैतन्यमात्मानमतिसुन्दरम् ॥ उपस्थेत्यं तसंसक्तोमालिन्यमधिगच्छति ४ ॥

तदेवं श्लोकत्रयेण ज्ञानिनीशिष्येदृश्यमानं विषयव्यवहार माक्षिप्येदानीं सर्वज्ञानीषु विषयव्यवहारं शिष्यपरीक्षार्थं गुरुरा क्षिपति ॥ श्रुत्वापीति ॥ शुद्धचैतन्यं श्रुत्वापि गुरुमुखाद्वेदान्तवा क्यतः साक्षात्कृत्यापि उपस्थे समीपस्थे विषये अत्यन्तसंसक्तः सन्नात्मज्ञः कथंमालिन्यं मौढ्यमधिगच्छति प्राप्नोति । अस्य प्रक रणस्य शिष्यजिज्ञासार्थमाक्षेपमुद्रयैव प्रवृत्तत्वाद्यत्राक्षेपवाचकं पदं न दृश्यते तत्र तदध्यात्वर्त्तव्यम् ४ ॥

सर्वभूतेषुचात्मानं सर्वभूतानिचात्मनि ॥ मुनेर्जानत आश्चर्यंममत्वमनुवर्त्तते ५ ॥

पुनरप्याश्चर्यमुद्रयाक्षिपति ॥ सर्वभूतेष्विति ॥ सर्वभूतेषु ब्र ह्मादिस्थावरांतेषु आत्मानं अधिष्ठानभूतं जानतः सर्वभूतानि चात्मनि रज्जौभुजंगवदध्यस्तानि जानतो मुनेर्विषयेषु ममत्व मनुवर्त्तत इति आश्चर्यं असंभाव्यम् ॥ नहि शुक्तिकायामध्यस्तं रजतमिति जानतस्तत्रममत्वं संभवतीति भावः ५ ॥

आस्थितःपरमाद्वैतं मोक्षार्थेपिव्यवस्थितः ॥ आश्च र्यंकामवशगो विकलःकेलिशिक्षया ६ ॥

आस्थित इति ॥ परमं सजातीयविजातीयस्वगतभेदशून्य मद्वैतमास्थितः साक्षादनुभवन् तथा मोक्षस्वरूपोर्थः सच्चिदा नन्दात्मा तत्र व्यवस्थितस्तदेकप्रवणोपि कामवशगः सन् केलि शिक्षया नानाक्रीडाभ्यासेन विकलो दृश्यत इत्याश्चर्यम् ६ ॥

उद्भूतंज्ञानदुर्मित्रमवधार्यातिदुर्बलः ॥ आश्चर्यंका ममाकांक्षेत्कालमन्तमनुश्रितः ७ ॥

उद्भूतमिति ॥ उद्भूतं कामं ज्ञानदुर्मित्रं ज्ञानस्यात्यन्तवैरिणं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवधार्य निश्चित्यापि अतिदुर्बलः अतिशयेन ज्ञानबलशून्यइव ज्ञानी कामं विषयमाकांक्षेत् कामं वांछति इदमाश्चर्यं कीदृशः अन्तं कालं अनुसमीपेश्रितः । नहि समीपवर्त्तिन्यन्तकालेसति विवेकिनो विषयतृष्णायुक्तेत्याभिप्रायः ७ ॥

इहामुत्रविरक्तस्य नित्यानित्यविवेकिनः ॥ आश्चर्यं मोक्षकामस्य मोक्षादेवबिभीषिका ८ ॥

इहेति ॥ एहिकामुष्मिकभोगविरक्तस्य नित्यमात्मतत्वमनित्यं शरीरादिकं तद्विवेकिनः मोक्षः सच्चिदानन्दस्तत्रकामोन्तःकरणं यस्य एवं विधस्य ज्ञानिनोपि मोक्षादेव असद्रूपतनुधनवियोगादेव बिभीषिका भयं दृश्यते नहि स्वप्नदृष्टतनुधननाशेपि जाग्रतांभयंक्वापिदृष्टमिति भावः ८ ॥

धीरस्तुभोज्यमानोपि पीड्यमानोपिसर्वदा ॥ आत्मानंकेवलंपश्यन्नतुष्यतिनकुप्यति ९ ॥

एव माक्षेपमुद्रया पूर्वमुक्तं अथ ज्ञानिनस्तोषरोषावनुचिताविति कंठतो निरूपयति ॥ धीरइति ॥ धीरोज्ञानीलोकैर्विषयान् भोज्यमानोपि तथा निन्दादिना पीड्यमानोपि सर्वदा आत्मानं केवलसुखदुःखभोगादिरहितं पश्यन् न तुष्यति नचकुप्यति तोषरोषहेतूनां केवलात्मनि असम्भवज्ञानादित्यर्थः ९ ॥

चेष्टमानंशरीरंस्वंपश्यत्यन्यशरीरवत् ॥ संस्तवेचापिनिंदायांकथंक्षुभ्येन्महाशयः १० ॥

किञ्च तोषरोषहेतूनां स्तुतिनिन्दादीनां शरीरधर्मत्वाच्छरीरस्यचात्मभिन्नत्वेनानुसन्धानात्कथं ज्ञानिनस्तोषरोषावित्याह ॥ चेष्टमानमिति ॥ स्वंशरीरं स्वात्मभिन्नं चेष्टाश्रयत्वात् अन्यशरीरवत् इति यः पश्यति समहाशयः संस्तवे श्रुतौ अपिच निन्दायां कथं क्षुभ्येत्कथं तोषरोषरूपां विक्रियां व्रजेदित्याक्षेपः १० ॥

मायामात्रमिदंविश्वंपश्यन्विगतकौतुकः ॥ अपिसंनिहितेमृत्यौकथंत्रस्यतिधीरधीः ११ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मार्यमारकयोरसत्यत्वानुसन्धानात्संनिहितेपि मृत्यौज्ञानिन स्त्रासः कथमित्याह ॥ मायामात्रमिति ॥ इदं दृश्यमानं विश्वं मार्यमारकादिरूपं समग्रं मायामात्रमसत्यरूपं पश्यन्नत एव कुत इदं शरीरादिकं जायते कुत्रच विलयं यातीत्येवं रूपकौतुकरहित स्तथाधीरास्वस्वरूपादविचलाधीर्यस्य सः संनिहिते मृत्यौ सत्यपि कथं त्रस्यतीत्याक्षेपः ११ ॥

निस्पृहंमानसंयस्य नैराश्येपिमहात्मनः ॥ तस्यात्म ज्ञानतृप्तस्य तुलनाकेनजायते १२ ॥

सर्वेषामाक्षेपाणां समर्थनार्थं ज्ञानिनो निरूपमत्वमाह ॥ नि स्पृहमिति ॥ यस्य नैराश्ये मोक्षेपि मानसं निस्पृहं तस्य आत्म ज्ञानतृप्तस्य ब्रह्माहमस्मीति जानतः समाप्तसर्वमनोरथस्य के न समं तुलना जायते न केनापीत्यर्थः १२ ॥

स्वभावादेवजानानो दृश्यमेतन्नकिञ्चन ॥ इदंग्राह्य मिदंत्याज्यं सकिंपश्यतिधीरधीः १३ ॥

ज्ञानिनःहानोपादानादिव्यवहारमाक्षिपति ॥ स्वभावादि ति ॥ प्रपञ्चोमिथ्यादृश्यत्वाच्छुक्तिकारजतवदित्यनुमानादेतत् दृश्यं न किञ्चन न सत् नाप्यसदिति जानानो निश्चिन्वन् योध रधीः सइदं ग्राह्यमिदं त्याज्यमिति कथं पश्यतीत्याक्षेपः १३ ॥

अन्तस्त्यक्तकषायस्य निर्द्वन्द्वस्यनिराशिषः ॥ यदृच्छ याऽऽगतोभोगो नदुःखायचतुष्टये १४ ॥

इतिश्रीमदष्टावक्रप्रकरणेतृतीयंप्रकरणम् ॥

अत्रहेतुमाह ॥ अन्तस्त्यक्तेति ॥ अन्तःकरणात् त्यक्ताः कषाय विषयवासना येन तस्य निर्द्वन्द्वस्य शीतोष्णादिसमचित्तस्य आ एव निराशिषः विषयवांछाविहीनस्य यदृच्छया दैवयोगात् आगत प्राप्तोभोगःभुज्यमानोविषयःदुःखाय न भवति तुष्टयेच न भवति १

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामाक्षेपद्वा रोपदेशचतुर्दशकंनामतृतीयंप्रकरणम् ३ ॥

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हन्तात्मज्ञस्यधीरस्य खेलतोभोगलीलया ॥ नहिसं सारवाहकैर्मूढैःसहसमानता १ ॥

गुरुणैवमुपाक्षिप्तः शिष्योज्ञानदृशोल्लसन् । ज्ञानिन्यशेषचेष्टानां स्पष्टमाचेष्टसम्भवम् ॥ एवं तावद्गुरुणा परीक्षार्थमाक्षिप्तः शिष्यः प्रारब्धवशाद्बाधितानुवृत्त्या ज्ञानिन्यपि सर्वव्यवहाराणामुपपत्ति मात्मज्ञानोल्लासवशादेवाहषड्भिः श्लोकैः ॥ हंतेति ॥ हंतेत्यात्म ज्ञानोल्लसिते हर्षे हेगुरो आत्मज्ञस्य सर्वाधिष्ठानतया स्वात्मानं जानतः अतएव धीरस्य विषयैरविक्षिप्तचित्तस्य भोगलीलया विषयभोगादिरूपया लीलया क्रीड़या प्रारब्धवशात्प्रवृत्तया खेल तः क्रीड़तः संसारवाहकैः संसारवृतियपशुभिर्मूढैर्देहादिष्वात्म वेदिभिःसहनहिसमानतानैवतुल्यत्वं तदुक्तं भगवता॥ तत्त्ववित्तुम हाबाहो गुणकर्मविभागयोः । गुणागुणेषुवर्त्तंत इतिमत्वानसज्जते इति १ ॥

यत्पदंप्रेप्सवोदीनाः शक्राद्याःसर्वदेवताः ॥ अहोतत्र स्थितोयोगी नहर्षमुपगच्छति २ ॥

ननु संसारिव्यवहारस्थो ज्ञानीकथं न संसारितुल्यइत्याशंक्य हर्षादिरहितत्वात्तस्य वैलक्षण्यमाह ॥ यत्पदेति ॥ अहोइति सम्बो धने हेगुरो यद्वा अहो आश्चर्यं शक्राद्याः सर्वदेवताअपि यत्पदं प्रे प्सवः यत्पदप्राप्तिमिच्छंतोदीनास्तदप्राप्तितः शोच्यावर्तन्तेतत्र सच्चिदानन्दाख्ये पदेस्थितस्तत्त्वं पदार्थैक्येन वर्त्तमानो योगीलब्ध साक्षात्कारो विषयलाभान्नहर्षंप्राप्नोति नापि तदपगमादुद्विग्नोभ वतीत्यर्थः २ ॥

तद्ज्ञस्यपुण्यपापाभ्यांस्पर्शोह्यंतर्नजायते ॥ नह्याकाशस्यधूमेन दृश्यमानापिसङ्गतिः ३ ॥

तद्ज्ञस्य विध्यकिङ्करत्वं वक्तुं पुण्याद्यसंस्पर्शमाह ॥ तद्ज्ञ स्येति ॥ तत्त्वं पदार्थैक्याभिज्ञस्य पुण्यपापाभ्यां सह ॥ अन्तःकरण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्माणां स्पर्शः सम्बन्धोनजायते। ज्ञानाग्निः सर्वकर्माणि भस्मसा त्कुरुतेर्जुनेति स्मृतेः अत्र दृष्टान्तमाह ॥ नहीति ॥ यथाहि आका शस्य धूमेन सह दृश्यमानापि सङ्गतिर्नास्ति तथात्मज्ञस्य न पुण्यपापादिसङ्गतिरित्यर्थः ३ ॥

आत्मैवेदंजगत्सर्वंज्ञातंयेनमहात्मना॥ यदृच्छयावर्त्त मानं तंनिषेद्धुंक्षमेतकः ४ ॥

ननुकर्मणिकृतेकथंनपुण्यादिस्पर्शइत्याशंक्य ज्ञानिनो विधि निषेधाऽनियम्यत्वमाह ॥ आत्मैवेति ॥ येनमहात्मना इदं दृश्य मानं सर्वंजगत् आत्मैवेति ज्ञातं ज्ञानिनं यदृच्छया प्रारब्धवशादेव वर्त्तमानं प्रवर्तमानं कोवचनकलापो निषेद्धुंप्रवर्त्तयितुं वा क्षमः समर्थोनकोपीत्यर्थः तदुक्तं शारीरकभाष्ये। अविद्यावद्विषयोचेदइ ति॥ प्रबोधनीय एवासौ सुप्तोराजेववन्दिभिरिति स्मृतिरपि ४ ॥

आब्रह्मस्तंबपर्यन्ते भूतग्रामेचतुर्विधे ॥ विज्ञस्यैवहि सामर्थ्यमिच्छानिच्छाविवर्जने ५ ॥

ननुज्ञानेन यदृच्छया प्रवर्त्तते किं त्विच्छयैवं इच्छानिच्छयोर्नि वर्त्तयितुमशक्यत्वादित्याशंक्याह ॥ आब्रह्मेति ॥ यद्यपि ब्रह्माणमा रभ्यस्तंबपर्यन्तैरिच्छानिच्छे विवर्जयितुमशक्ये तथापि विज्ञ स्यैवेच्छाद्वेषनिवर्तने सामर्थ्यमतो यदृच्छया प्रवर्तमानो ज्ञानी न विधिनियम्य इत्यर्थः ५ ॥

आत्मानमद्वयंकश्चिज्जानातिजगदीश्वरम् ॥यद्वेत्ति तत्सकुरुते नभयंतस्यकुत्रचित् ६ ॥

अद्वैतज्ञानेन द्वितीयस्य बाधितत्वात् ज्ञानिनां भयहेतुः कोपि नास्तीत्युपसंहरति ॥ आत्मानमद्वयंकश्चिज्जानातिजगदीश्वरमि ति ॥ कश्चित् सहस्रेष्वेक एव जगदीश्वरं तत्पदार्थं आत्मानंत्व पदार्थं अद्वयं अभिन्नं जानाति सयद्वेत्ति प्रारब्धवशाद्बाधितानुवृ त्त्येद कर्तव्यमिति मन्यते तत्करोति एवं कुर्वतस्तस्य कुत्रचित् इह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाऽमुत्रचाभयंनास्ति भयहेतोरद्वैतज्ञानवाधितत्वादितिभावः ६॥

इत्यष्टावक्रमुनिविरचितेऽध्यात्मशास्त्रेशिष्यप्रोक्तात्मानुभ
वोल्लासषट्कविवरणं ॥

इत्युल्लासषट्कम् ॥ नतेसङ्गोस्तिकेनापिकिंशुद्धस्त्य
क्तुमिच्छसि ॥ संघातविलयंकुर्वन्नेवमेवलयंव्रज १ ॥

एवमुल्लासषट्केन स्वशिष्येपिपरीक्षिते । गुरुर्दृढोपदेशार्थं ल
ययोगमथाब्रवीत् ॥ एवमुल्लासषट्केन शिष्येपरीक्षितेसति । पुन
र्दृढोपदेशार्थमाचार्योलयमुपदिशति श्लोकचतुष्टयेन॥ नतइति॥
हेशिष्यशुद्धबुद्धस्वभावस्य तवकेनापि देहगेहादिनाहङ्कारममकारा
स्पदेन नसङ्गोस्ति अतः शुद्धोऽसङ्गस्त्वं किंत्यक्तुमुपादातुं चेच्छसि
तस्मात्संघातस्य देहस्य विलयंकुर्वन्नहंदेहइति निरसनं कुर्वन्नेवमे
वदेहादि निरसनरूपमेवलयंव्रज १ ॥

उदेतिभवतोविश्वंवारिधेरिवबुद्बुदः ॥ इतिज्ञात्वैकमा
त्मानमेवमेवलयंव्रज २ ॥

उदेतीति ॥ हेशिष्य भवतःसकाशाद्विश्वमुदेति भवद्भिन्नमेव
यथा वारिधेःसकाशाद्बुद्बुदो वारिधेरभिन्न एवोदेति इत्येवं प्रकारेण
एकं सजातीयादिभेदरहितमात्मानंज्ञात्वा एवमेव एकात्मज्ञानमेव
लयंव्रज २ ॥

प्रत्यक्षमप्यवस्तुत्वाद्विश्वंनास्त्यमलेत्वयि ॥ रज्जुस
र्पइवव्यक्तमेवमेवलयंव्रज ३ ॥

ननुप्रत्यक्षतोभिन्न तयाहारसर्पादिभेदे प्रतीयमाने कथंहाना
दि विलयइत्यतआह ॥प्रत्यक्षमिति ॥ प्रत्यक्षमपीदं व्यक्तं दृश्यं
विश्वममलेत्वयिनास्त्येव अवस्तुत्वाद्रज्जुभुजङ्गवत् तस्मात् एव
मेवलयंव्रज द्वितीयस्य हेयस्योपादेयस्यैवाऽभावादित्यर्थः ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समदुःखसुखःपूर्णआशानैराश्ययोःसमः॥समजीवित मृत्युःसन्नेवमेवलयंव्रज ४ ॥

इतिपंचमप्रकरणम् ५

समेति ॥ पूर्णआत्मानन्दपूर्णस्त्वमतएव दैववशादुद्भूतयोः सुखदुःखयोः समः इच्छानिच्छयोश्चसमस्तथा जीवितेमृत्यौच समोनिर्विकारः सुखदुःखादीनामनात्मधर्माणांतुच्छत्वानुसन्धानात् त्वं सुखदुःखादिषु समब्रह्मदृष्टिरूपंलयंव्रजेत्यर्थः ४ ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां पञ्चमंप्रकरणम् ५

आकाशवदनन्तोहं घटवत्प्राकृतञ्जगत् ॥ इतिज्ञानं तथैतस्यनत्यागोनग्रहोलयः १ ॥

गुरुणैवंपरीक्षार्थमुपदिष्टेलयेसति । पूर्णात्मनोलयादीनां शिष्योऽसम्भवमब्रवीत् ॥ तदेवं गुरुणात्यन्तपरीक्षार्थं लययोगेसमुपदिष्टेसति लयाद्यभावोपपादकमात्मज्ञानमनुवदन्नेवशिष्यः पूर्णात्मनो लयाद्यसम्भवमाह चतुर्भिः श्लोकैः ॥ आकाशवदिति ॥ अहमात्माकाशवदनन्तःनन्वनन्तस्यात्मनोदेहादिनिवासः कथमित्यतआह ॥ घटवदिति ॥ प्रकृतं प्रकृतिकार्यं जगद्देहादिकं घटवत् तथाचात्मनोदेहादिरेकदेशावच्छेदकएव व्योम्नइव घटादिरित्यर्थः॥ अत्रप्रमाणमाह ॥ इतीति ॥ इत्येवं वेदान्तसिद्धं ज्ञानमतोत्र नान्यथा भावशङ्केत्यर्थः ॥ तथेति ॥ तथा सत्यात्मानोऽनन्तत्वे सत्येतस्यात्मनस्त्यागो ग्रहणं लयश्च नसम्भवति परिच्छिन्नस्यैव घटादेस्त्यागादिदर्शनादित्यर्थः १ ॥

महोदधिरिवाहंसःप्रपञ्चोवीचिसन्निभः॥इति० ॥ २॥

घटाकाशदृष्टान्ते देहात्मनोर्भेदशङ्कास्यादित्यऽपरितोषादाह ॥ महोदधिरिति ॥ स्पष्टं २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहंसशुक्तिसङ्काशोरूप्यवद्विश्वकल्पना ३ ॥

समुद्रबीचि दृष्टान्ते देहात्मनोर्विकारविकारि शङ्कास्यादित्य ऽपरितोषादाह ॥ अहंइति ॥ स्पष्टं ३ ॥

अहंवासर्वभूतेषुसर्वभूतान्यथोमयि ॥ इति ७ ॥ इत्युत्तरोपशचतुष्कम् ४ ॥

इति षष्ठं प्रकरणम् ॥

शुक्तिदृष्टान्तेप्यात्मनि परिच्छिन्नत्व शङ्कास्या तद्व्यावृत्त्यर्थमाह ॥ अहमिति ॥ अहंवाअहमेव सर्वभूतेषु प्रकृतिप्राकृतिकेषु सत्तास्फूर्त्यादिप्रदत्वेनास्मि अथोतोहेतोः सर्वभूतान्यधिष्ठान भूतेमयि वर्त्तन्ते इतिज्ञानं वेदान्तसिद्धान्तं तथा सत्येतस्यात्मनस्त्यागादिकं नसम्भवतीत्यर्थः ४ ॥

इतिश्रीमद्विश्वरवि०षष्ठंप्रकरणं ६ ॥

मय्यनन्तमहांभोधौ विश्वपोतइतस्ततः ॥ भ्रमति स्वान्तवातेननभमास्यसहिष्णुता १ ॥

लययोगाननुष्ठाने व्यवहारंनिरंकुशम् । आशंक्यशिष्यःस्वौल्लासादब्रवीद्गुरुमुत्तरं ॥ ननुलययोगाभावे संसारविक्षेपेनिरंकुशप्रसरःस्यादित्याशंक्यतस्याऽनिष्टत्वभावन्नुभव पञ्चकेनोत्तरमाहशिष्यः॥ मयीति ॥ मय्यात्मनिअनन्ते महासमुद्रे विश्वाख्यः पोतः नैका स्वान्तवातेन मनः पवनेन इतस्ततोभ्रमति अत्रसमअसहिष्णुता असहनतानास्ति समुद्रस्येव नौकापरिभ्रमणइत्यर्थः जगद् व्यवहारस्याऽनिष्टत्वाभावः पूर्वमुक्तः १ ॥

मय्यनन्तमहांभोधौ जगद्वीचीस्वभावतः ॥ उदेतुवास्तमायातुनमेवृद्धिर्नचक्षति २ ॥

अथजगदुदयापगमयोरपि नानिष्टातेत्याह ॥ मयीति । मयि आत्मनिअनन्ते विनाशरहिते महति व्यापकेम्भोधौ समुद्रे जगदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ख्याद्विधिस्वभावतः दृश्यत्वादि स्वभावादुदेतुच अपरमस्तमाया तुममतुतदुदये वृद्धिर्नास्तिव्यापकत्वात् तदपगमेचक्षतिर्नास्ति अनन्तत्वादित्यर्थः २ ॥

मय्यनन्तमहांभोधौविश्वंनामविकल्पना ॥ अतिशान्तोनिराकारएतदेवाहमास्थितः ३ ॥

पूर्वदृष्टान्ते स्वात्मनोजगद्विकारइति भ्रमःस्यात्तद्वारणार्थमाह॥ मयीति ॥ मयिअनन्तमहांभोधौ नामप्रसिद्धं विश्वंकल्पना भ्रम मात्रमेव नतुलययोगन्तस्य पूर्वमेवदूषितत्वात् ३ ॥

नात्माभावेषुनोभावस्तत्रानन्तेनिरञ्जने ॥ इत्यसक्तोस्पृहःशान्तएतदेवाहमास्थितः ४ ॥

अतिशान्तत्वंस्पष्टयति ॥ नात्मेति ॥ आत्माभावेषु देहादिषु आधेयतयानास्तिव्यापत्वात् भावोदेहादिस्तत्रात्मनिनास्ति निरञ्जनत्वात् इति कारणादहमसक्तः संसर्गरहितोनएवास्पृहः इच्छा धर्मासंश्लिष्टोऽतः शान्तइत्यर्थः ४ ॥

अहोचिन्मात्रमेवाहमिन्द्रजालोपमंजगत् ॥ अतोममकथंकुत्रहयोपादेयकल्पना ५ ॥

इत्यनुभवपञ्चकम् ॥

इच्छादिरहितत्वे हेत्वन्तरमप्याह ॥ अहोइति ॥ अहोअस्याश्चर्यरूपमलौकिकं चिन्मात्रं चेतन्यमात्रमेवाहं जगत्सर्वं प्रपञ्चजातंइन्द्रजालोपमं दर्शनं कालेपि पृथक् सत्तारहितं अतो विश्वस्य पृथक्सत्तारहितत्वान्मम कुत्रवस्तूनि कथंकेन कारणेन हेयोपादेयबुद्धिःस्यान्नकुत्रापीत्यर्थः ५ ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामनुभवपञ्चकंविवरणंसमाप्तम् ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदाबन्धोयदाचित्तंकिञ्चिद्वांछतिशोचति ॥ किञ्चिन्मुञ्चतिगृह्णाति किञ्चिद्धृष्यतिकुप्यति १ ॥

इत्थंपरीक्षितज्ञानं शिष्यमेवाभिनन्दितुम् । गुरुर्बन्धस्यमोक्षस्य व्यवस्थांसम्यगब्रवीत् ॥ तदेवंषड्भिः प्रकरणैः स्वशिष्यं सम्यक् परीक्ष्य बन्धमोक्षव्यवस्थानिरूपणव्याजेन गुरुःस्वशिष्यानुभवमभिनन्दति चतुर्भिः श्लोकैः ॥ तदेति ॥ हेशिष्यअतोममकथंकुत्रहेयोपादेयकल्पनेत्यन्तं यत्त्वयोक्तंतत्तथैव यतश्चित्तं यदावांछादिविकारवद्भवति तदैव जीवस्यबन्धइत्यर्थः १ ॥

तदामुक्तिर्यदाचित्तं नवांछतिनशोचति ॥ नमुञ्चतिनगृह्णातिनहृष्यतिनकुप्यति २ ॥

तदामुक्तिरिति ॥ यदाचित्तंवांछादि विक्रियातीतं तदामुक्तिरित्यर्थः २ ॥

तदाबन्धोयदाचित्तंसक्तङ्कास्वपिदृष्टिषु ॥ तदामोक्षो यदाचित्तमसक्तसर्वदृष्टिषु ३ ॥

तदेवं पृथक्बन्धमोक्षाउक्तौ अथसमुच्चयेन बन्धमोक्षावाह ॥ तदाबन्धइति ॥ यदाचित्तङ्कास्वप्यनात्मदृष्टिषु संसक्तंतदाबन्धः यदाचित्तं सर्वास्वप्यनात्मदृष्टिष्वसक्तं तदामोक्षइत्यर्थः ३ ॥

यदानाहंतदामोक्षो यदाहंबन्धनन्तदा ॥ मत्वेतिहेलयाकिञ्चिन्माग्रहाणविमुञ्चमा ४ ॥

इत्यष्टावक्रेबन्धमोक्षचतुष्कमष्टमप्रकरणम् ॥

अस्तुवाधितानुवृत्त्या दग्धंपटायमानासर्वापि विषयदृष्टिस्तथाप्यहङ्कारनिवृत्तौ मोक्षस्तदनुवृत्तौच बन्धइति वदन्नेव शिष्योक्तमर्थमभिनन्दितुमनुवदति ॥ यदानाहमिति ॥ यदाहमित्येवं रूपः प्रथमाध्यासोऽनर्थमूलभूतो निवर्त्तते तदामोक्षः यदाचसोऽनुव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्त्तते बन्धनमिति ज्ञात्वा हेलयानायासेनैव हानोपादानादिक्रियाणामकर्तात्वमासि । अकर्तात्मज्ञानेन कर्तृत्वाभिमानो छेदादितिभावः४ ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायांगुरुप्रोक्तं बन्धमोक्षव्यवस्थाप्रकरणंअष्टमंसमाप्तम् ८ ॥

कृताकृतेचद्वन्द्वानि कदाशान्तानिकस्यवा ॥ एवंज्ञात्वेहनिर्वेदाद्भवत्यागपरोव्रती १ ॥

शिष्योक्तानुभवस्यैव दाढ्यार्थंगुरुणोच्यते । निर्वेदस्पष्टमष्टाभिरिच्छादित्यजनात्मकः ॥मत्वेति हेलयाकिञ्चिन्मागृहाणेति यदुक्तं तत्र किंद्वारमित्यपेक्षायां गुरुरनुमोदनमुद्रया वैराग्याष्टकमाह ॥ कृतेति ॥ कृताकृते इदंकर्तव्यमिदमकर्तव्यमित्यभिनिवेशौद्वन्द्वानि सुखदुःखादीनि कस्यकदावाशान्तानि अपितुनकस्यापि न कदापि शान्तानीत्येवंज्ञात्वाइहकृताकृतादिषुनिर्वेदादभिनिवेशादिपरित्यागा देवत्यागपरोभव । कीदृशस्त्वं अव्रती ॥ नास्तिव्रतं कुत्राप्यग्रहोयस्यसः १ ॥

कस्यापितातधन्यस्य लोकचेष्टावलोकनात् ॥ जीवितेच्छाबुभुक्षाचबुभुत्सोपशमङ्गता २ ॥

चित्तधर्मत्यागरूपो निर्वेदस्तुकस्यचिदेवस्यान्नतु सर्वस्येत्याह ॥ कस्यापीति ॥ हेतातशिष्य सहस्रेषुमध्येकस्यचिदेवधन्यस्योत्पत्तिविनाशरूपलोकचेष्टावलोकनात् जीवितेच्छाभोगेच्छा ज्ञानेच्छादय उपशमङ्गताः इदन्तु तादृशनिर्वेदसम्पन्नंशिष्यमभिनन्दितुमेवोच्यते नतुपादिश्यतइति प्रागुक्तमेव २ ॥

अनित्यंसर्वमेवेदं तापत्रितयदूषितम् ॥ असारंनिन्दितंहेयमितिनिश्चित्यशाम्यति ३ ॥

ननुज्ञानिनां सर्वत्रेच्छोपशमः किंहेतुकइत्यतआह ॥ अनित्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मिति ॥ इदंदृश्यमानं सर्वप्रपञ्चजातं अनित्यं चैतन्येध्यस्तं । तथा पृथक्सत्वेन गृह्यमाणंसत् आध्यात्मिकाऽधिदैविकाऽधिभौतिक तापत्रितयदूषितं अतएव असारंतुष्टं अतएव हेयं पृथक् रूपतयानैवादरणीयमिति निश्चित्यज्ञानीशाम्यति कुत्रापि इच्छांनकुरुते३

कोसौकालोवयःकिंवा यत्रद्वन्द्वानिनोनृणाम् ॥ तान्युपेक्ष्ययथाप्राप्तवर्तीसिद्धिमवाप्नुयात् ४ ॥

द्वन्द्वानामारब्धकर्मवशादवश्यं भावित्वा तत्रेच्छानिच्छेविहाय यथा प्राप्तभोगीमुक्तिमाप्नुयादित्याह॥कोसाविति॥यत्रनृणांद्वंद्वानि सुखदुःखादीनि नसन्ति असौकः कालः कावाबाल्यादिवयोलक्षणा शरीरावस्था । आपितुनकापीति विचार्य्यतानिद्वंद्वान्युपेक्ष्य तत्रेच्छामनिच्छामकृत्वा यथा प्राप्तेषु अनासक्ततयावर्तीसिद्धं मुक्तिं अवाप्नुयादित्यर्थः ४ ॥

नानामतंमहर्षीणां साधूनांयोगिनान्तथा ॥ दृष्ट्वानिर्वेदमापन्नःकोनशाम्यतिमानवः ५ ॥

तर्कशास्त्रादिज्ञानेषु निष्ठानकर्त्तव्या नानाविप्रतिप्रतिग्रस्तत्वान्नापिकर्मसुनापि अष्टांगयोगादिष्वित्याह ॥ नानामतमिति ॥ महर्षीणांगौतमजैमिनिप्रभृतीनां नानामतं नानाविधं अपरिच्छिन्नं दृष्ट्वातर्कशास्त्रादिभ्यो निर्वेदंआपन्नस्तथा साधूनांकर्मनिष्ठानांमतं नानाविधंकेचिद्धोमपराः केचिज्जपपराःकेचित् कृच्छ्रचान्द्रायणादि पराइति नानाविधं दृष्ट्वा कर्मभ्योपि निर्वेदमापन्नस्तथा योगिनांमतं नानाविधं केचिद्दृष्टांगयोगपराः केचिन्महदादिप्रसंख्यानपराइति नानाविधं दृष्ट्वाष्टांगयोगादिभ्योपि निर्वेदमापन्नः केवलमात्मानुसन्धाननिष्ठः कोनशाम्यति कः सुखंनप्राप्नोतीत्यर्थः५

कृत्वामूर्तिंपरिज्ञानञ्चेतनस्यनकिंगुरुः ॥ निर्वेदसमतायुक्त्यायस्तारयतिसंसृतेः ६ ॥

केवलज्ञाननिष्ठामेवाश्रित्य कर्मादिकंमाकुर्वित्याह ॥ कृत्वेति॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निर्वेदसमतायुक्त्या निर्वेदोनामविषयानासक्तिस्तथाशत्रुमित्रेषुस
मता सर्वत्रात्मबुद्धिः युक्तिर्नामश्रुत्यनुग्राहकस्तर्कएतैः चैतन्यस
च्चिदानन्दस्य मूर्तिपरिज्ञानं स्वरूपसाक्षात्कारंकृत्वा तदनन्तरं ना
स्तिकश्चित् गुरुर्यस्य सनकिंगुरुः एवंविधोयः संसृतेः सकाशादा
त्मानं तारयति ६ ॥

पश्यभूतविकारांस्त्वं भूतमात्रान्यथार्थतः ॥ तत्क्ष
णाद्बन्धनिर्मुक्तःस्वरूपस्थोभविष्यसि ७ ॥

चेतनस्वरूपज्ञानोपायमाह ॥ पश्येति ॥ हेशिष्यभूतविकारान्
दे हेन्द्रियादीन् यथार्थतस्तत्वतो भूतमात्रान् पश्यनतु आत्मस्वरू
पान् एवंसतित्वंतत्क्षणात् बन्धनिर्मुक्तः शरीराहंभावनिर्मुक्तःसन्
शरीरादिविविक्तात्म स्वरूपस्थोभविष्यसि। शरीरादावनात्मतया
ज्ञातेसति तत्साक्षीभूत आत्माझटिति सुज्ञेयइतिभावः ७ ॥

वासनाएवसंसारइतिसर्वाविमुञ्चताः॥ तत्त्यागोवास
नात्यागस्थितिरद्ययथातथा ८ ॥

इतिनिर्वेदाष्टकम् ॥

नन्वेवमात्मनिज्ञातोपि तत्रनिष्ठाकथंस्यादित्याशंक्य वासन
त्यागादित्याह ॥ वासना॥ विषयवासना एवसंसारइति कारणात
तावासनास्त्वंमुञ्च ॥ वासनात्यागाच्चात्मनिष्ठायां सत्यांन्तस्य स
सारस्य त्यागइत्यर्थः अद्यअधुना वासनात्यागे सतिस्थितिर्यथ
तथायथाप्रारब्धं तथा स्थितिरित्यर्थः ८ ॥

इतिनिर्वेदाष्टकम् ॥

विहायवैरिणङ्काममर्थञ्चानार्थसंकुलम् ॥ धर्ममप्ये
तयोर्हेतुंसर्वत्रानादरंकुरु १ ॥

विषयाणामभावेपि तुष्टिर्निर्वेदईरितः तत्सिद्ध्यर्थञ्चविषयेवै
तृष्णयंशान्तिरीर्यते। विषयैविनापि सन्तोषरूपोनिर्वेदः प्रागुक्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथेदानींविषयतृष्णोपशममभिनन्दनमुद्रया गुरुरुदाहरति ॥ विहायेति ॥ कामंवैरिणं ज्ञानशत्रुं विहायतथाअनर्थसंकुलं अर्ज्जने रक्षणे व्ययेचानेकशोकदुःखसंकुलं अर्थं विहाय तथा एतयोः कामार्थयोरनर्थहेतुं धर्ममपि विहाय सर्वत्र त्रिवर्गहेतुकर्मसु अनादरं उपेक्षांकुरु १ ॥

स्वप्नेन्द्रजालवत्पश्यदिनानित्रीणिपञ्चवा॥मित्रक्षेत्रधनागारदारदायादसम्पदः २ ॥

ननुमित्रक्षेत्रादिफलकेषुकर्मसु कथमनादरइत्याशंक्य मित्रादीनामनित्यत्वमाह ॥ स्वप्नेन्द्रेति ॥ हेशिष्य मित्रादिसम्पदः स्वप्नेन्द्रजालवत्पश्य यतो दिनानि त्रीणि पञ्चवास्थायिन्यइत्यर्थः२॥

यत्रयत्रभवेत्तृष्णासंसारंविद्धितंतदा ॥ प्रौढवैराग्यमास्थायवीततृष्णःसुखीभव ३ ॥

सर्वत्रानादरंकुर्वित्यनेनोक्तं वैहतुष्णंपुरुषार्थहेतुरित्याह ॥ यत्र यत्रेति ॥ यत्र यत्र येषु येषु प्रसिद्धेषु विषयेषु तृष्णा भवेत्तमेव संसारं विद्धि विषयतृष्णाया एव कर्मद्वारा संसारहेतुत्वात् अतः प्रौढवैराग्यं प्राप्तेऽर्थे प्रीत्यभावमास्थाय वीततृष्णः अप्राप्ते अर्थे इच्छारहितः सन्नात्मनिष्ठया सुखीभवेत्यर्थः ३ ॥

तृष्णामात्रात्मकोबंधस्तन्नाशोमोक्षउच्यते ॥ भवसंसक्तिमात्रेणप्राप्तितुष्टिर्मुहुर्मुहुः ४ ॥

अमुमेवार्थंभंग्यंतरेणाह ॥ तृष्णामात्रेति तृष्णामात्रस्वरूप एव बन्धः कर्मद्वाराबंधहेतुत्वात् । तन्नाशस्तृष्णानाशएव मोक्षो निवृत्तिहेतुत्वात् । तन्नाशो मोक्षइत्यत्र हेतुमाह ॥ भवेति ॥ भवतीति भवो देहादिविषयस्तत्र संगाऽभावमात्रेण मुहुर्मुहुर्वारंवारं प्राप्तितुष्टिः आत्मप्राप्तितः संतृप्तः स्यादतस्तृष्णानाशएव मोक्ष इत्यर्थः प्राप्तिस्तुष्टिरिति पाठे प्राप्तिःस्यात् तुष्टिश्चस्यादित्यर्थः४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमेकश्चेतनःशुद्धोजडंविश्वमसत्तथा ॥ अविद्या पिनकिंचित्साकाबुभुत्सातथापिते ५ ॥

ननुबुभुत्सारूपा तृष्णाकथं त्याज्येत्याशंक्याह ॥ त्वमेकइति। इहजगति त्रयएव पदार्था आत्मजगत् अविद्याच तत्रआत्माता त् त्वमेवैकः चेतनः शुद्धोनतु चिद्भिन्नइति स्वात्मानमेवैकं पूर्णज्ञा त्वा नान्या पुनरात्मबुभुत्सायुक्तानापिजगद्बुभुत्सायुक्ता जगत असत्वात् जड़त्वाच्च । नापि अविद्या बुभुत्सायुक्ता । तस्याअ सदसद्विलक्षणरूपा निर्वचनीयत्वात् तथाच तवबुभुत्सापिका क्ता न काचिदपीत्यर्थः ५ ॥

राज्यंसुताःकलत्राणिशरीराणिसुखानिच ॥संसक्तस्य पिनष्टानितवजन्मनिजन्मनि ६ ॥

जडंविश्वं असदित्युक्तं तद्विशदयति ॥ राज्यमिति ॥ राज्य दीनि सर्वाणि संसक्तस्यापि आसक्तिं कुर्वाणस्यापि तवजन्मनि जन्मनि नानाजन्मसुनष्टानीत्यतो विश्वमसदित्यर्थः ६ ॥

अलमर्थेनकामेन सुकृतेनापिकर्मणा ॥ एभ्यःसंसा कान्तारेनविश्रांतमभून्मनः ७ ॥

बुभुत्सापि न कर्त्तव्येति प्रागुक्तं अथ धर्मार्थकामेष्वपीच्छानक र्त्तव्येत्याह ॥ अलमिति ॥ अर्थादिना अलं अर्थकामधर्मेषु इच्छानक र्त्तव्यर्थः अत्रहेतुमाह ॥ एभ्यइति ॥ यतः कारणात् संसारकान्ता संसारलक्षणे दुर्गमेवर्त्मनि भ्राम्यतस्तवएभ्यः अर्थादिभ्यः विश्र न्तिर्भ्रमणाविच्छेदोनाभूदतोर्थादितृष्णानकर्त्तव्येत्यर्थः ७ ॥

कृतंनकतिजन्मानि कायेनमनसागिरा ॥ दुःखमाय सदंकर्मतदद्याप्युपरम्यताम् ८ ॥

इत्युपशमाष्टकम् ॥

तृष्णाया उपशमःप्रागुक्तः अथ क्रियामात्रोपशममाह ॥ कृतं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति ॥ होशिष्य आयासदंप्रयासप्रदं अतएव दुःखं कर्मकायादिना कतिजन्मानिनकृतं अपि तु यावदद्य प्राचीनसर्वजन्मस्वपिकृतं कर्मणातुत्वयाऽनर्थएव लब्धस्ततस्मादद्यापि अधुनापि कर्मभ्य उपरम्यतां ८ ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायांगुरुप्रोक्त मुपशमप्रकरणंदशमम् १० ॥

भावाभावविकारश्चस्वभावादितिनिश्चयी ॥ निर्विकारोगतक्लेशःसुखेनैवोपशाम्यति १ ॥

उक्ताशान्तिर्नविज्ञानं विनाकस्यापिजायते । इतिनिश्चेतुमेवाह गुरुर्ज्ञानामृताष्टकम् । उक्ताशान्तिर्विज्ञानादेवस्यान्नत्वन्यथेति बोधयितुं ज्ञानाष्टकमाह । तत्रादौज्ञानसाधनान्याह ॥ भावाभावेति ॥ भावाभावरूपोविकारः स्वभावात् मायातत्संस्कारादेव जायते नतु निर्विकारादात्मन इति निश्चयवान् पुरुषो निश्चय बलादेव सुखेनैव अनायासेनैव ज्ञानमात्रेण तुष्टः सन्नुपशाम्यति १ ॥

ईश्वरःसर्वनिर्मातानेहान्यइतिनिश्चयी॥ अन्तर्गलितसर्वाशःशान्तःक्वापिनसज्जते २ ॥

ननुमायायाजड़त्वरूपएवकथं भावाभावविकारइत्याशंक्याह। ईश्वरइति॥ ईश्वरएव सर्वनिर्माता नत्वन्योजीवईश्वरपरवशत्वात् इति निश्चयीपुरुषो निश्चयवशादेवान्तर्गलितसर्वतृष्णः अतएव शान्तोनिश्चलचित्तः सन् क्वापिनसज्जते २ ॥

आपदःसंपदःकालेदैवादेवेतिनिश्चयी ॥ तृप्तःस्वच्छेन्द्रियोनित्यंनवांछतिनशोचति ३ ॥

नन्वीश्वरएव चेत्सर्वनिर्माता तर्हिकांश्चिद्दारिद्रान् कश्चित्तुधनिनस्तथा कांश्चित्सुखिनः कांश्चित्तुदुःखिनो रचयतस्तस्य वैष

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्यनैर्धृण्येस्यातामित्याशंक्याह ॥ आपदइति ॥ काले समयविशेष आपदः संपदश्च दैवात्प्राक्तनादृष्टा देवेश्वरपरिपाचिता देवेति निश्चयी अतएव तृप्तोवितत्तृष्णः अतएव नित्यंस्वच्छेन्द्रियोविषयाऽनाकृष्टेन्द्रियः अप्राप्तं वांछति नष्टञ्च नशोचतीत्यर्थः ३ ॥

सुखदुःखेजन्ममृत्युदैवादेवेतिनिश्चयी ॥ साध्यादर्शीनिरायासःकुर्वन्नपिनलिप्यते ४ ॥

ननूक्तनिश्चयवानपि कर्माणि कुर्वन्नेव दृश्यत इत्याशंक्याह सुखेति ॥ कर्मफलभूतं सुखादिकं दैवाददृष्टादेवइति निश्चयीअतएव मयाइदंफलं साध्यमित्यदर्शी अतएव निरायासः श्रमरहितः प्रारब्धवशात् कुर्वन्नपि नलिप्यते कर्मजानर्थभागीनभवति कर्तृत्वाध्यासरहितत्वादित्यर्थः ४ ॥

चिन्तयाजायतेदुःखंनान्यथेहेतिनिश्चयी ॥ तयाहीनःसुखीशान्तःसर्वत्रगलितस्पृहः ५ ॥

ननुकुर्वंश्चेत्कथं निरायासः इत्याशंक्याह ॥ चिन्तयेति ॥ इह दुःखंचिन्तया जायतेनान्यथेति निश्चयी अतएव तया चिन्तया हीनः अतएव शान्तः स्थिरान्तःकरणः अतएव सर्वत्रसुख तत्साधनयोर्गलितस्पृहः पुरुषः सुखीभवतीत्यर्थः ५ ॥

नाहंदेहोनमेदेहोबोधोहमितिनिश्चयी ॥ कैवल्यमिवसंप्राप्तोनस्मरत्यकृतंकृतम् ६ ॥

उक्तसाधनैः सिद्धज्ञानिनांदशां निरूपयति ॥ नाहमिति ॥ अहंदेहोन तथा मेदेहोन किंतु नित्यबोधोहमिति ज्ञानवशाद्देहादौ निवृताहंममाभिमानः देहादिनाकृतमकृतञ्च मयाकृतमिति न स्मरति यथा कैवल्यं विदेहकैवल्यंप्राप्तः कृताकृतं न स्मरति तद्वदित्यर्थः ६ ॥

आब्रह्मस्तंबपर्यन्तमहमेवेतिनिश्चयी ॥ निर्विकल्पःशुचिःशान्तःप्राप्ताप्राप्तविनिर्वृतः ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आब्रह्मेति ॥ ब्रह्माणंहिरण्यगर्भमारभ्य तृणस्तंबपर्यन्तं सर्वं जगदहमेवेति प्रत्यक्षनिश्चयवान् पुरुषः निर्विकल्पः सङ्कल्पविकल्पशून्यअतएव शुचिर्विषयासङ्गरूपमलरहितः अतएव शान्तो निश्चलान्तःकरणः अतएव प्राप्ताप्राप्तयोरपि विषययोर्निवृतः परमसन्तोषवानात्मानन्दपूर्णत्वादित्यर्थः ७ ॥

नानाश्चर्यमिदंविश्वंनकिंचिदितिनिश्चयी ॥ निर्वासनःस्फूर्तिमात्रोनकिंचिदिवशाम्यति ८ ॥

इतिश्रीज्ञानाष्टकंएकादशप्रकरणम् ॥ ११ ॥

नन्वात्मज्ञानीकथं निर्विकल्पादिरूप इत्याशंक्याह ॥ नानेति॥ अधिष्ठानतत्वसाक्षात्कारेणाध्यस्तवाधेसति नानाश्चर्यमयं विश्वंजगत् नकिञ्चित् पृथक्सत्ताशून्यमिति निश्चयीपुरुषः निवृत्तवासनः केवलचिद्रूपः सन्न किञ्चिदिव विशेषव्यवहारागोचर एवशाम्यति निवृतकार्यकारणोपाधिर्भवति । तत्वज्ञानेन सर्वस्यापि स्वप्नवन्निवृत्तेरित्यर्थः ८ ॥

इतिज्ञानाष्टकंसमाप्तम् ॥

कायकृत्यासहपूर्वंततोवाग्विस्तरासहः ॥ अथचिन्तासहस्तस्मादेवमेवाहमास्थितः १ ॥

गुरुणोदीरितंज्ञानं नकिंचिदिवशाम्यति । तत्स्वास्मिन्नप्यभिख्यातुं शिष्योवदतिसांप्रतम्॥उक्तं ज्ञानाष्टकेन किंचिदिव नशाम्यति इति तदेव शिष्यः स्वस्मिन् विशदयितुमेवमेवाष्टकमाह तत्र प्रथमं कायवाङ्मनसां व्यापारोपरममाह ॥ कायेति ॥ अहं पूर्वमपि कायकर्मासहस्ततो वाग्विस्तरासहः जपकर्मासहः अथातोमनोव्यापाररूपा या चिंता तत्राऽसहस्तस्माद्धेतोः एवमेव निर्व्यापारएव अहं आस्थितः असामस्त्येनास्थित इत्यर्थः १ ॥

प्रीत्यभावेनशब्दादेरदृश्यत्वंनचात्मनः ॥ विक्षेपैकाग्रहृदयएवमेवाहमास्थितः २ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उक्तव्यापारत्रयोपरमे हेतुं वदन्नेवोक्तमनुवदति ॥ प्रीत्याभावेनेति ॥ क्षयिष्णुफलजनकस्य शब्दादेः शब्दकायकर्मद्वयस्य प्रीत्यभावेन प्रीत्यविषयत्वेन आत्मनश्चादृश्यत्वेन त्रिविधविक्षेपेभ्यो व्याहृतं एकाग्रं हृदयं यस्य स विक्षेपैकाग्रहृदय इति मध्यमपदलोपीसमासः । क्षयिष्णुफलकजपादेः प्रीतिविषयत्वाज्जपादिरूपो विक्षेपो ममनास्ति आत्मनश्चादृश्यत्वाद्ध्यानाद्यविषयत्वाच्चिंतारूपो ममनास्तीत्यर्थः अतएवमेव स्वस्वरूपेणैव अहमास्थितः २ ॥

समाध्यासादिविक्षिप्तौव्यवहारःसमाधये ॥ एवंविलोक्यनियममेवमेवाहमास्थितः ३ ॥

ननु तथापि समाध्यर्थं व्यवहारः कर्तव्य इत्याशंक्य नेत्याह ॥ समाध्यासादीति ॥ कर्तृत्वभोक्तृत्वाद्यनर्थाध्यासादिभिर्विक्षिप्तौ सत्यांतन्निरासार्थं समाधये व्यवहारो नान्यथेति नियमंविलोक्य शुद्धात्मज्ञानिमप्यध्यासाभावादेवमेव समाधिशून्य एवाहमास्थितेत्यर्थः ३ ॥

हेयोपादेयविरहादेवंहर्षविषादयोः ॥ अभावादप्यहो ब्रह्मन्नेवमेवाहमास्थितः ४ ॥

हेयेति ॥ पूर्णात्मदर्शिनो ममहेयोपादेयवस्तुनो विरहात् एवममुनाप्रकारेण हर्षविषादयोरप्यभावात् हेब्रह्मन् गुरो अद्य अधुना अहमेवमेवास्थितः ४ ॥

आश्रमानाश्रमाध्यानंचित्तस्वीकृतवर्ज्जनात् ॥ विकल्पंममवीक्ष्यैतैरेवमेवाहमास्थितः ५ ॥

आश्रमेति ॥ आश्रमानाश्रमाध्यानंच तथा तत्प्रयुक्तं चित्तस्वीकृतंच तद्वर्ज्जनंच एतैस्त्रिभिरेव ममविकल्पं सकल्पं वीक्ष्य अहं एवमेव एतात्त्रितयरहित एवास्थितः ५ ॥

कर्मानुष्ठानमज्ञानाद्यथैवोपरमस्तथा ॥ बुध्वासम्यगिदंतत्वमेवमेवाहमास्थितः ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्मेति ॥ यथैव कर्मानुष्ठानमज्ञानात् तथैव उपरमः कर्मोप्य ज्ञानादेव इदं सम्यक् यथार्थतो बुध्वा अहमेवमेव कर्म तदुपरम रहितएवास्थितः ६ ॥

अचिंत्यंचिन्त्यमानोपिचिन्तारूपंभजत्यसौ ॥ त्यक्त्वा तद्भावनंतस्मादेवमेवाहमास्थितः ७ ॥

अचिन्त्यमिति ॥ अचिन्त्यं ब्रह्मेति चिंत्यमानोप्यसौ आत्मा चिंतालक्षणं रूपं भजति ॥ तस्माद्धेतोः तद्भावनं अचिन्त्यं ब्रह्मेति भावनं त्यक्त्वा अहमेवमेव भावनारहितएवास्थितः ७ ॥

एवमेवकृतंयेन सकृतार्थोभवेदसौ ॥ एवमेवस्वभावो यःसकृतार्थोभवेदसौ ८ ॥

इत्येवमेवाष्टकम् ॥

एवमेवेत्यवस्थायाः साधकोपिश्रेष्ठः किंपुनस्तत्तादभावइति कैमुतिकन्यायेनाह ॥ एवमेवेति ॥ येन एवमेव सर्वक्रियारहित मेव स्वरूपंसाधनवशात्कृतं सोसौ कृतार्थोभवेत् यस्तुएवमेव स्व भाववान् सोसौकृतार्थोभवतीति किंवक्तव्यमित्यर्थः ८ ॥

इतिश्रीमद्विश्वेश्वरवि०मेवमेवाष्टकंद्वादशप्रकरणम् १२ ॥

अकिञ्चनभवंस्वास्था कौपीनत्वेपिदुर्लभम् ॥ त्या गादानेविहायास्मादहमासेयथासुखम् १ ॥

एवमेवेत्यवस्थायाःफलीभूतांसुखस्थितिम्। प्राहशिष्यस्फुटीकर्तुं महमासेयथासुखम्। अशौचमेवेत्यवस्थायाः फलीभूतां सुखावस्थां स्वकीयां विशदयितुमाह ॥ अकिञ्चनेति ॥ अकिञ्चनभवं सर्वासं गाऽभावप्रभवं स्वास्थ्यं चित्तस्थैर्यं कौपीनत्वेपि नासक्तावपि दुर्ल भं अस्मात्कारणादहं त्यागादानेविहाय त्यागादानयोरासक्तिंविहा य यथासुखं सुखमतिक्रम्यासेन कदाचित्दुःखीत्यर्थः १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुत्रापिखेदःकायस्य जिह्वाकुत्रापिखिद्यते ॥ मनःकुत्रापितत्यक्त्वापुरुषार्थेस्थितःसुखम् २ ॥

कुत्रापीति ॥ कुत्रापि शारीरकर्मणि कायस्यखेदः कुत्रापि वाचिककर्मणि जिह्वाखिद्यते । कुत्रापि ध्यानादिकर्मणिमनः खिद्यति । अतोहंतत् त्रयमपित्यक्त्वासुखं यथास्यात्तथा पुरुषार्थे स्वात्मन्येवस्थितः २ ॥

कृतङ्किमपिनैवस्यादितिसञ्चित्यतत्वतः ॥ यदायत्कर्त्तुमायातितत्कृत्वासेयथासुखम् ३ ॥

ननुकायवाङ्मनोव्यापारत्यागे देहएवसद्यः पतेत् भोजनाद्युपानादेरपित्यागादित्याशंक्याह ॥ कृतमिति ॥ शरीरेन्द्रियादिभिः कृतं किमपितत्वत आत्मकृतं न स्यादिति सञ्चित्य यदायच्छरीरादिकर्मकर्त्तुमायाति तदहंकारशून्यत्वेन कृत्वा अहं यथा सुखमासे ३ ॥

कर्मनैष्कर्म्मनिर्बन्ध्यभावादेहस्थयोगिनः ॥ सङ्गात्संयोगविरहादहमासेयथासुखम् ४ ॥

ननुकर्म वा नैष्कर्म्यं वा एकत्वनिष्ठावश्यं स्वीकार्या पुरुषार्थार्थिनेत्याशंक्याह ॥ कर्मेति ॥ कर्मनैष्कर्म्यनिर्बन्धरूपाः भावाः स्वभावादेहस्थयोगिनः देहासक्तयोगिन एव अहंतुदेहसंयोगाद्देहसंयोगविरहादपि यथासुखंआसे तथाच ममदेहाद्यासङ्गाभावान्न कर्मनैष्कर्म्यनिर्बन्धइत्यर्थः ४ ॥

अर्थानर्थौनमेस्थित्यागत्यावाशयनेनवा ॥ तिष्ठन्गच्छन्स्वपंस्तस्मादहमासेयथासुखम् ५ ॥

अथलौकिकव्यापारेपि ममनिर्बन्धइत्याह ॥ अथेति ॥ मम स्थित्यादिनासाध्यौ अर्थानर्थौनस्तः पूर्णात्मदर्शित्वात् तस्मादनासक्तयातिष्ठन् गच्छन् स्वपन् वा अहं यथा सुखंआसे ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वपतोनास्तिमेहानिःसिद्धिर्यत्नवतोनवा ॥ नाशोल्लासोविहायास्मादहमासेयथासुखम् ६ ॥

एतदेवभंग्यन्तरेणाह ॥ स्वपतइति ॥ स्वपतोयत्नरहितस्यमे ममहानिर्नास्ति यत्नवतश्च वा ममसिद्धिर्नास्ति अस्मात्कारणात् यत्नायत्नयोर्नाशोल्लासोविहाय अहं यथा सुखंआसे ६ ॥

सुखादिरूपानियमंभवेष्वालोक्यभूरिशः ॥ शुभाशुभेविहायास्मादहमासेयथासुखम् ७ ॥

इतियथासुखसप्तकम् ॥

सुखादीति ॥ भवेषु अवतारेषु सुखादिरूपानियमं सुखदुःखादिधर्माणां अनित्यत्वं भूरिशोबहुषु स्थलेष्वालोक्य अस्मात् सुखाद्यनित्यत्वदर्शनाद्धेतोरहं यथा सुखमासे ७ ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां यथासुखसप्तकम् ॥

प्रकृत्याशून्यचित्तोयःप्रमादाद्भावभावनः ॥ निद्रितेबोधितइवक्षीणसंसरणोहिसः १ ॥

उदीरितां सुखावस्थां समर्थयितुमात्मनि ॥ प्राहशिष्यः शमावस्थांचतुः श्लोक्यागुरुंप्रति ॥ पूर्वंतु गुरुणोपशमाष्टकमुक्तं संप्रतितुशिष्यः स्वसुखावस्थासमर्थनार्थमात्मनः शमावस्थामाह ॥ प्रकृत्येति ॥ प्रकृत्यास्वभावेन विषयेषु शून्यचित्तः प्रमादादबुद्धिपूर्वकमारब्धवशाद्भावान् विषयान् भावयति चिन्तयतीति भावभावनः कइव निद्रितो बोधितइव स यथा निद्रावशाच्छून्यचित्तः केनचिद्बोधितत्वा त्प्रमादाद्भावभावनः एवंविधोयःपुमान्विषयेषु शान्तचित्तः सः हिनिश्चितं क्षीणसंसरणः संसारहेतुविषयान् स्मरणाभावादित्यर्थः १ ॥

क्वधनानिक्वमित्राणिक्वमेविषयदस्यवः ॥ क्वशास्त्रंक्वचविज्ञानंयदामेगलितास्पृहा २ ॥

क्वधनानीति ॥ विषयभावनाशून्यस्य पूर्णात्मदर्शिनो मे यदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्पृहा विषयतृष्णागलिता तदामेममधनानि क्वविषयरूपादस्य वश्चौराः क्वशास्त्रञ्च क्वविज्ञानमहंब्रह्मास्मीति निदिध्यासनंच क्व धनादिविज्ञानांतेष्वममावस्थानास्तीत्यर्थः २ ॥

विज्ञातेसाक्षिपुरुषेपरमात्मनिचेश्वरे ॥ नैराश्येमोक्ष बंधेचनचिन्तामुक्तयेमम ३ ॥

विज्ञातइति ॥ देहेन्द्रियादीनां साक्षिपुरुषत्वं पदार्थेपरमात्मनि चेश्वरेतत्पदार्थे विज्ञाते ब्रह्माहमस्मीति साक्षात् कृतेसति नित्यनि र्मुक्तचिद्रूपात्मतानुभावात् मोक्षबन्धेपि नैराश्येसति ममसुक्त्य र्थंनचिन्ता ३ ॥

अन्तर्विकल्पशून्यस्यबहिःस्वच्छन्दचारिणः ॥ भ्रान्त स्येवदशास्तास्तादृशाएवजानते ४ ॥

इति शान्तिचतुष्कम् ॥

ननुप्रमादाद्भावभावकः कथं शान्तइत्याशंक्याह ॥ अन्तर्विक ल्पेति ॥ अन्तःकरणे विकल्पशून्यस्य वहिर्भ्रांतस्येव स्वच्छन्दचा रिणो ज्ञानिनोदशास्तादृशाएव ज्ञानिनएव जानते ४ ॥

इतिश्रीअष्टावक्रटीकायांशिष्यप्रोक्तंशांतिचतुष्टयम् ॥

यथातथोपदेशेनकृतार्थःसत्वबुद्धिमान् ॥ आजीवम पिजिज्ञासुः परस्तत्रविमुह्यति १ ॥

दुर्लक्ष्यमात्मनस्तत्वं प्रत्यापयितुमञ्जसा । मुहुस्तत्वोपदेशार्थं गुरुराहदयोदधिः१॥ यद्यपि प्रथममात्मतत्वोपदेशः कृतएव तथापि तदात्मतत्व मंतेवासिभ्यः पुनः पुनरुपदेष्टव्यं दुर्लक्ष्यत्वात् यथा छान्दोग्योपनिषदिनवकृत्वःश्वेतकेतुंप्रतीत्या चारशिक्षार्थमसकृदा त्मोपदेशंगुरुराह तत्रादौ ज्ञानाधिकारिण मनधिकारिणंचाह॥ यथा तथेति॥सत्वबुद्धिमान् शिष्यो यथातथा आपात्ततोप्युपदेशेन कृता र्थःस्यात् अतएव कृतयुगेप्रणवमात्रोपदेशादपि शिष्याः कृतार्थाब भूवुः परः असत्वबुद्धिर्याचजीवं जिज्ञासुरपिबहुधोपादिष्टोपि विमु ह्यति यथा विरोचनोब्रह्मणा बहुधोपदिष्टोपि मुमोहैवेत्यर्थः १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मोक्षोविषयवैरस्यंबंधोवैषयिकोरसाः ॥ एतावदेवविज्ञानंयथेच्छसितथाकुरु २ ॥

अथबन्धमोक्षौसुखोपायेन संग्रहेण निरूपयति ॥ मोक्षइति ॥ विषयेष्वनुरागाभावएवमोक्षः । विषयेष्वनुरागस्तुबन्ध इत्यर्थः एतावदेव बन्धमोक्षयोर्विशिष्टमुत्कृष्टंज्ञानं । एवं ज्ञात्वा च त्वं यथेच्छसि तथाकुरु २ ॥

वाग्मिप्राज्ञमहोद्योगंजनंमूकंजडालसम् ॥ करोति तत्वबोधोयमतस्त्यक्तोबुभुक्षुभिः ३ ॥

इदन्तु विषयवैरस्यं तत्वबोधसाध्यमित्याह ॥ वाग्मीति ॥ अयंप्रसिद्धः आत्मतत्ववोधः वाग्मिनं बहुचतुरवाक्यभाषिणं मूकं करोति प्रज्ञवानाविशेषवेदिनंजनं जडंकरोति महोद्योगं नाना क्रियानुष्ठानशालिनं अलसं निष्क्रियंकरोति मनसः पृथक् प्रणवतया वागादयः कुंठिता भवन्ति तद्रहितो भवतीत्यर्थः यतोयं तत्वबोधः वागादीन् कुंठितान् करोति अतोहेतोर्भोगेच्छुभिस्त्यक्तः अनादृत इत्यर्थः ३ ॥

नत्वंदेहोनतेदेहोभोक्ताकर्त्तानवाक्षवान् ॥ चिद्रूपोसिसदासाक्षीनिरपेक्षःसुखंचर ४ ॥

नत्वबोधसिद्ध्यर्थमुपदिशति ॥ नत्वमिति ॥ त्वंदेहादिरूपो नयतश्चिद्रूपोसि । नापि तवदेहसम्बन्धः असंगोह्ययं पुरुषइति श्रुतेः । नवाभवान् कर्ताभोक्ता । यतः कर्तृभोक्तृप्रभृतीनां सदा साक्षी सतद्भिन्नः यथा घटसाक्षी घटादित्यर्थः । अतस्त्वंदेहतत्संबन्धिषु निरपेक्षःसन् सुखंचरेत्यर्थः ४ ॥

रागद्वेषौमनोधर्मौनमनस्तेकदाचन ॥ निर्विकल्पोसिबोधात्मानिर्विकारःसुखंचर ५ ॥

निरपेक्षत्वमुपपादयितुमाह ॥ रागेति ॥ रागद्वेषौतु मनोधर्मौ नतु तवधर्मौमनस्तु कदाचिदपि तवसम्बन्धिनभवति अतस्तदध्यासाद्रागाद्याध्यासंमाकुर्वित्यर्थः । ननु रागद्वेषौममैवधर्मौ कथं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नेत्याशंक्याह ॥ निर्विकल्प इति ॥ यतस्त्वंनिर्विकल्पः बोधात्मा चासि अतो रागादिविकाररहितः सन् सुखंचरेत्यर्थः ५ ॥

सर्वभूतेषुचात्मानंसर्वभूतानिचात्मनि ॥ विज्ञायनिरहंकारोनिर्ममस्त्वंसुखीभव ६ ॥

किंच ॥ सर्वेति ॥ सर्वभूतेषु कारणत्वेनानुस्यूतमात्मानं विज्ञाय विभाव्य सर्वभूतानिचात्मनि अध्यस्तानीति विभाव्य अहंकारादेः सर्वस्यात्मत्वेनैव स्फुरणादहंममाभिमानरहितस्त्वं सुखीभव ६ ॥

विश्वंस्फुरतियत्रेदंतरंगाइवसागरे ॥ तत्त्वमेवनसंदेहश्चिन्मूर्त्तेर्विज्वरोभव ७ ॥

सर्वभूतानिचात्मनीत्येतद्विशदयति ॥ विश्वमिति ॥ यत्र इदं विश्वं सागरे तरंगा इवाधिष्ठानाभिन्नं तच्चैतन्यंत्वमेव अतः कारणात् हेचिन्मूर्त्तेत्वं विज्वरोभव चिन्मात्रोहमित्यनुभवान्निवृत्तसर्वसन्तापो भवेत्यर्थः ७ ॥

श्रद्धत्स्वतातश्रद्धत्स्वनात्रमोहंकुरुष्वभो ॥ ज्ञानस्वरूपोभगवान्आत्मात्वंप्रकृतेःपरः ८ ॥

परमकारुणिकतया पुनः पुनर्बोधयति ॥ श्रद्धत्स्वेति ॥ श्रद्धत्स्वतातश्रद्धत्स्व । अत्र चिद्रूपतायामसंभावनाविपरीतभावनारूपं मोहं न कुरुष्व । अत्रेत्युक्तं विशदयति ॥ ज्ञानेति ॥ ज्ञानस्वरूपः प्रकृतेः परस्त्वं । कीदृशस्त्वं भगवान् तत्पदार्थः । तथा आत्मात्वंपदार्थः ८ ॥

गुणैःसंवेष्टितोदेहस्तिष्ठत्यायातियातिच ॥ आत्मानंगंतानागंताकिमेनमनुशोचसि ९ ॥

गुणैरिति ॥ गुणैरिन्द्रियादिभिः संवेष्टितोदेहइहलोके तिष्ठति तथा आयाति तथा किंचित्कालं यातिचगच्छति देहादिभिन्नः आत्मातु न गंता नप्यागंता अतोहंगंताहं मरिष्यामि इत्येवमेव किं शोचसि देहधर्मैरात्मानं माशुचइत्यर्थः ९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देहस्तिष्ठतुकल्पांतंगच्छत्वद्यैववापुनः ॥ क्कवृद्धिःक्क चवाहानिस्तवचिन्मात्ररूपिणः १० ॥

नत्वदेहस्थित्युत्क्रांतिभ्यां तववृद्धिहानीइत्याह ॥ देहइति ॥ नित्यचिन्मात्ररूपिणस्तव देहस्थित्यानवृद्धिर्न वादेहनिवृत्त्याहा निरित्यर्थः १० ॥

त्वय्यनन्तमहांभोधौविश्ववीचिस्वभावतः ॥ उदेतु वास्तमायातुनतेवृद्धिर्नवाक्षतिः ११ ॥

किञ्च ॥ त्वयीति ॥ विश्वाख्यावीचिरपि त्वय्यनन्तचित्समुद्रे उदेतु अथवास्तमायातु तावतोपितेन वृद्धिर्नवाक्षतिस्तवानन्त त्वादित्यर्थः ११ ॥

तातचिन्मात्ररूपोसिनतेभिन्नमिदंजगत् ॥ अतःक स्यकथंकुत्रहेयोपादेयकल्पना १२ ॥

किञ्च ॥ तातेति ॥ सर्वस्य त्वदभिन्नत्वात्किंहेयमुपादेयं केन वाप्रकारेण हेयमुपादेयं कुत्र वाहेयमुपादेयमित्यर्थः १२ ॥

एकस्मिन्नव्ययेशान्ते चिदाकाशेऽमलेत्वयि ॥ कुतो जन्मकुतःकर्मकुतोहंकारएवच १३ ॥

किञ्च ॥ एकस्मिन्निति॥ एकस्मिन् सजातीयविजातीयस्वगत भेदशून्येऽव्ययेशान्तेच कार्यशून्ये चिदाकाशनिर्मलेच सर्वोपाधि शून्ये त्वयिकुतो जन्मकुतश्च कर्मकुतश्चाहङ्कारद्वितीयस्य हेतो रभावात् अव्ययस्यच जन्माऽसम्भवात् कार्यशून्यस्यच कर्मकर्तृ त्वासम्भवात् निर्मलस्यचाहङ्काराऽसम्भवादित्यर्थः १३ ॥

यस्त्वंपश्यसितत्रैकस्त्वमेवप्रतिभाससे ॥ किंपृथग्भा सतेस्वर्णात्कटकांगदनूपुरम् १४ ॥

एकत्वमुपपादयति ॥ यस्त्वमिति ॥ यद्यत्कार्यंत्वं पश्यसि तत्र कारणरूपस्त्वंएवएकः प्रतिभाससेकटकाङ्गदादौ स्वर्णवदित्यर्थः१४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अयंसोहमयंनाहंविभागमितिसंत्यज ॥ सर्वमात्मे तिनिश्चित्यनिःसंकल्पःसुखीभव १५ ॥

अयंसोहमिति ॥ कारणरूपआत्मेवसर्वमिति निश्चित्यभेदंत्य ज तथा चेन्निर्विकल्पो विगतनानाप्रतिभासः सन् सद्वितीयप्रति भानाद्धि दुःखंभवतीत्यर्थः १५ ॥

तवैवाज्ञानतोविश्वंत्वमेकःपरमार्थतः ॥ त्वत्तोन्योना स्तिसंसारीनासंसारीचकश्चन १६ ॥

विभागत्यागेयुक्तिमाह ॥ तवैवेति ॥ तवैव अज्ञानतोविश्वं वि श्वाकारोविक्षेपः अतः परमार्थतस्त्वमेकः त्वत्तः अन्यः संसारीना स्तिकश्चन असंसारीनास्ति १६ ॥

भ्रान्तिमात्रमिदंविश्वंनकिंचिदितिनिश्चयी ॥ निर्वा सनस्फूर्तिमात्रोनकिंचिदिवशाम्यति १७ ॥

भ्रान्तिमात्रेति ॥ इदंविश्वंभ्रान्तिमात्रसिद्धं अतोहेतोर्नकिञ्चि त् पृथक्सत्तारहितमित्यर्थः इतिनिश्चयी अतएव सर्वस्य निस्त त्वान्निर्वासनस्फूर्तिमात्रो वासनारहितस्फूर्तिमात्रः सन् नकिञ्चि दिव निरस्ताशेषविशेषःसन्शाम्यति १७ ॥

एकएवभवांभोधावासीदस्तिभविष्यति ॥ नतेबन्धो स्तिमोक्षोवाकृतकृत्यःसुखंचर १८ ॥

एकएवेति ॥ कालत्रयेपिभवांभोधौ एकस्त्वमेव अतस्तवबन्ध मोक्षौनस्तः कृतकृत्यःसन्सुखञ्चर १८ ॥

मासंकल्पविकल्पाभ्यांचित्तंक्षोभयचिन्मय ॥ उपशा म्यसुखंतिष्ठस्वात्मन्यानन्दविग्रहे १९ ॥

मासङ्कल्पेति ॥ हेचिन्मयत्वं सङ्कल्पविकल्पाभ्यां चित्तं मा क्षो भय उपशाम्य उपरतसङ्कल्पविकल्पोभव आनन्दरूपे स्वात्मनि सुखंतिष्ठ १९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्यजावध्यानंसर्वत्रमाकिंचिद्धृदिधारय ॥ आत्मात्वं मुक्तएवासिकिंविमृश्यकरिष्यसि २० ॥

इति तत्वोपदेशविंशतिकम् ॥

ध्यानमपित्यजेत्याह ॥ त्यजेति ॥ सर्वत्रध्यानंत्यज कुत्रापि ध्यानंमाकार्षीरित्यर्थः एतदेव विशदयति माकिञ्चित् हृदिधारयेति मननमपित्यजेत्याह ॥ आत्मेति ॥आत्मात्वं सदामुक्तएवासि अतोविमृश्यविचार्य्यकिंफलं करिष्यसि नित्यमुक्तत्वादित्यर्थः२०॥

इतिश्रीमद्विश्वेश्वरविरचितायांतत्वोपदेशविंशतिकम् ॥

आचक्ष्वशृणुवातातनानाशास्त्राण्यनेकशः ॥ तथापि नतवस्वास्थ्यंसर्वविस्मरणादृते १ ॥

पृथक्सत्वेन सर्वस्य विस्मृतिर्मुक्तिसाधनम् । तृष्णाद्यनर्थविच्छेदद्वारेणेत्यत्रवर्ण्यते । तत्वज्ञानेन सर्वप्रपंचस्य पृथक्सत्तया विस्मरणं कारिणैव तृष्णाऽपायादिद्वारा मुक्तिर्नान्यथेति विशेषमुपदिशति ॥ आचक्ष्वेति ॥ हेतातत्वंनानाशास्त्राणि अनेकशः अनेकवारं शिष्येभ्यःआचक्ष्व गुरुभ्यःशृणु वा तथापि तवसर्वविस्मरणादृते स्वास्थ्यं श्रेयोनेत्यर्थः । सुषुप्त्यैतु यद्यपि विषयविस्मरणमस्ति तथापि अज्ञानविस्मरणंनास्तीति भावः । जीवन्मुक्तस्यतु सर्वस्याध्यस्तत्वानुसंधानरूपं विस्मरणमस्तीतिभावः १ ॥

भोगंकर्मसमाधिंवाकुरुविज्ञतथापिते ॥ चित्तंनिरस्तसर्वाशमत्यर्थंरोचयिष्यति २ ॥

सर्वविस्मरणेसति सर्वस्वरूपं वीक्ष्यचित्तं निरस्तसर्वाशंभवतीति सूचयन्नाह ॥ भोगमिति ॥ हेविज्ञत्वं भोगंकुरु कर्मवाकुरु । समाधिंवाकुरु । तथापि चित्तं अत्यर्थं रोचयिष्यति रुचिमुत्पादयिष्यति । कीदृशंचित्तं निरस्तसर्वाशं । सर्वविस्मरणेसति सर्वाशाऽनुदयादित्यर्थः २ ॥

आयासात्सकलोदुःखीनैनंजानातिकश्चन ॥ अनेनैवोपदेशेनधन्यःप्राप्नोतिनिर्वृतिम् ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वतृष्णाविलयेसति तुकृतेनापिकर्मणा दुःखहेतुरायासोन भवतीति सूचयन्नाह ॥ आयासादिति ॥ सकलोजनः । आयासा देवदुःखीभवति । परन्तुकश्चनएनं आयासंनजानाति दुःखहेतु रयमिति नवेति ॥ अनेनेति ॥ आयासात्सकलोदुःखीत्यनेनैवोप देशेनधन्यः सुकृतीनिर्वृतिंपरमसुखंप्राप्नोति ३ ॥

व्यापारेखिद्यतेयस्तुनिमेषोन्मेषयोरपि ॥ तस्मादस्य धुरीणस्यसुखंनान्यस्यवाक्वचित् ४ ॥

व्यापारानासक्तिः सुखहेतुरित्याह ॥ व्यापारेति ॥ यकर्मणि निमेषोन्मेषयोरपि व्यापारेखिद्यते अनासक्तो भवति अस्य आल स्यधुरीणस्य क्रियाभिनिर्वेशरहितस्य सुखं नान्यस्य क्रियाभि निवेशयुक्तस्य ४ ॥

इदंकृतमिदंनेतिद्वन्द्वैर्मुक्तंयदामनः ॥ धर्मार्थकाममो क्षेषुनिरपेक्षंतदाभवेत् ५ ॥

सर्वतृष्णाविलयेसति द्वन्द्वहानिरपि भवतीति सूचयन्नाह ॥ इदंकृतमिति ॥ इदंकृतमिदं नेत्यादिद्वंद्वैर्मुक्तं यदा मनोभवति त दा पुरुषार्थचतुष्टयेपि निरपक्षंभवेत् द्वन्द्वातीतस्य जीवन्मुक्तत्वा दित्यर्थः ५ ॥

विरक्तोविषयद्वेष्टा रागीविषयलोलुपः ॥ ग्रहमोक्षवि हीनस्तु नविरक्तोनरागवान् ६ ॥

पुरुषार्थकामनानिरपेक्षस्तु विरक्तकामुकाभ्यां विलक्षणइत्या ह ॥ विरक्तइति ॥ मुमुक्षुः सन्योविषयद्वेष्टा स विरक्तः कथ्यते कामसापेक्षःसन् यो विषयलोलुपः सरागीतिकथ्यते यस्तु ग्रह मोक्षविहीनः ग्रहमोक्षेच्छाभ्यां विहीनः सविरक्तरक्ताभ्यां विलक्ष णः सर्वतोनिरपेक्षतया हानोपादानेच्छारहितत्वादित्यर्थः ६ ॥

हेयोपादेयतातावत्संसारविटपांकुरः ॥ स्पृहाजीवति यावद्वै निर्विचारदशास्पदम् ७ ॥

ननु ज्ञानोपिहानोपादानादिव्यवहारोदृश्यत इत्यतआह ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हेयोपादेयतेति ॥ निर्विचारदशास्पदं अविवेकदशामयी भूतास्प हा तृष्णाजीवति तावत् पर्यन्तमेव हेयोपादेयताहानोपादानादि व्यवहारः संसारवृक्षस्य शाखांकुरोभवतिज्ञानिनातु स्पृहाभावात्स त्यपि हानादिव्यवहारे संसारशाखप्रसरोनभवतीत्यर्थः ७ ॥

प्रवृत्तौजायतेरागोनिवृत्तौद्वेषएवहि ॥ निर्द्वन्द्वोबाल वद्धीमानेवमेवव्यवस्थितः ८ ॥

किञ्च ॥ प्रवृत्ताविति ॥ प्रवृत्तौसरागप्रवृत्तौ सत्यामुत्तरोत्तरं विषयेषुरागोजायते विषयद्वेषपूर्वकनिवृत्तौ सत्यामुत्तरोत्तरं विषय द्वेषएवहिजायते आतोधीमान् ज्ञानीबालवत् शुभाशुभानुसंधानर हितः निर्द्वन्द्वः रागद्वेषविहीनःसन् एवमेव रागजप्रवृत्तिद्वेषजानिवृ त्तिरहितएवस्थितः केवलप्रारब्धवशादेव कदाचित्प्रवर्त्तते कदा चिन्निवर्त्ततेच नतुरागद्वेषवशादित्यर्थः ८ ॥

हातुमिच्छतिसंसारं रागीदुःखजिहासया ॥ वीतरा गोहिनिर्दुःखस्तस्मिन्नपिनखिद्यति ९ ॥

किञ्च ॥ हातुमिच्छतीति ॥ यस्तुरागीसदुःखजिहासया संसा रंहातुमिच्छति वीतरागस्तुनिर्दुःखा रागोत्थदुःखरहितत्वा तस्मि न् संसारेसत्यपि नखिद्यति खेदंनप्राप्नोति ९ ॥

यस्याभिमानोमोक्षेपि देहेपिममतातथा ॥ नवायोगी नवाज्ञानीकेवलन्दुःखभागसौ १० ॥

यस्येति ॥ अहंज्ञानी त्रिकालवृत्तान्तदर्शीमुक्तं इत्येवंयस्य मो क्षेप्यभिमानोनासौज्ञानी तथा अहं योगाभ्यासीदेहस्यैव गुणकर्म धर्मरतः ममदेहो बह्वाहारबहूपवासादि समर्थइत्येवं देहेप्याभिमा नोनासौ योगीनवाज्ञानी केवलमसौदुःखभाक् दुःखहेत्वहंममा भिमानाऽनिवृत्तेरित्यर्थः १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हारोपद्युपदेष्टाते हरिःकमलजोपिवा ॥ तथापिनत वस्वास्थ्यं सर्वविस्मरणादृते ११ ॥ इतिविशेषोपदेशः ॥

सर्वविस्मरणोपदेशमुपसंहरति ॥ हरइति ॥ स्पष्टं ११ ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां विशेषोपदेशप्रकरणम् ॥

तेनज्ञानफलंप्राप्तं योगाभ्यासफलन्तथा ॥ तृप्तःस्व च्छेन्द्रियोनित्यमेकाकीरमतेतुयः १ ॥

अथातःश्लोकविंशत्या तत्त्वज्ञस्य दयोच्यतो विद्यातज्ज्ञप्रकर्षस्य व्यक्तयेगुरुणास्फुटं अथान्येषामपिविद्यायांप्रवृत्त्यर्थं तत्त्वज्ञानफ लव्याचिख्यासया तत्त्वज्ञदशांगुरुर्निरूपयति ॥ तेनेति ॥ तेनैवज्ञा नादि फलंप्राप्तं यः आत्मन्येव तृप्तोनभोगादिना अतएव स्वच्छे न्द्रियोविषयानसक्तेंद्रियः सन् एकाकीविषयसंयोगंविनैव नित्य आत्मन्येवरमते १ ॥

नकदाचिज्जगत्यस्मिंस्तत्त्वज्ञोहन्तखिद्यति ॥ यतए केनतेनेदं पूर्णंब्रह्माण्डमण्डलम् २ ॥

नकदाचिदिति ॥ हन्तेति सहर्षसम्बोधने होशिष्य अस्मिन् ज गति कदाचिदपि तत्त्वज्ञोनखिद्यते यतएकेनैवतेनेदं ब्रह्माण्डमण्ड लं पूर्णंव्याप्तं अतोद्वितीयस्य भावान्नखिद्यतीत्यर्थः २ ॥

नजातुविषयाःकेपि स्वारामंहर्षयन्त्यमी ॥ सल्लकीप ल्लवप्रीतमिवेभन्निवपल्लवाः ३ ॥

किञ्च ॥ नजातुइति ॥ स्वस्मिन्नात्मन्येव आरमते तं स्वारा मंजातु कदाचित् अमीविषयानहर्षयन्ति तुच्छत्वात् यथा सल्लकी पल्लवप्रीतन्द्रभगंजं निवपल्लवानहर्षयन्ति कटुत्वादित्यर्थः ३ ॥

यस्तुभोगेषुभुक्तेषु नभवत्यधिवासितः ॥ अभुक्तेषुनि राकांक्षी तादृशोभवदुर्लभः ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किञ्च ॥ यस्त्विति ॥ यस्यभुक्तेषु भोगेष्वसक्तिर्नभवति अभुक्तेषु आकांक्षानभवति आत्मतृप्तत्वात् तादृशो भवदुर्लभः संसारकोटिष्वेकइत्यर्थः ४ ॥

बुभुक्षुरिहसंसारे मुमुक्षुरपिदृश्यते ॥ भोगमोक्षनिराकांक्षी विरलेहिमहाशयः ५ ॥

बुभुक्षुरिति ॥ संसारेबुभुक्षु मुमुक्षुश्चानेकधा दृश्यते भोगमोक्षनिराकांक्षी महतिपूर्णे ब्रह्मणि आशायोंतःकरणंयस्यस महाशयोविरलः तदुक्तं भगवताय ततामपिसिद्धानां कश्चिन्मांवेति तत्त्वत इति ५ ॥

धर्मार्थकाममोक्षेषु जीवितेमरणेतथा ॥ कस्याप्युदारचित्तस्यहेयोपादेयतानहि ६ ॥

धर्मार्थेति ॥ पुरुषार्थचतुष्टये तथा जीवितमरणयोर्यथायोग्य हेयोपादेयतारहितो विरलइत्यर्थः ६ ॥

वांछानविश्वविलयेनद्वेषस्तस्यचस्थितौ ॥ यथाजीविकयातस्माद्धन्यआस्तेयथासुखम् ७ ॥

वांछेति ॥ यस्मात् ज्ञानिनो विश्वविलये प्रपंचोपरमेवांछा नास्ति तस्य प्रपंचस्यस्थितौच द्वेषोनास्ति अधिष्ठानत्वेनैव स्फुरणात् तस्मात्कारणात्धन्योविद्वान् प्रारब्धवशात्प्राप्त यथा प्राप्त या जीविकया सुखमनतिक्रम्यास्ते इत्यर्थः ७ ॥

कृतार्थोनेनज्ञानेनेत्यवंगलितधीःकृती ॥ पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्नास्तेयथासुखम् ८ ॥

किंच ॥ कृतार्थइति अहंअनेनाऽद्वैज्ञात्मज्ञानेन कृतार्थ इत्येवं गलितधीःकृती ईक्षणादिकं कुर्वन्नपि सुखमनतिक्रम्यास्ते । कृतार्थत्वधियः सत्वाद्बहिरिंद्रिय व्यापारे सत्यपि अज्ञानि विरक्तवत्तस्यखेदोनभवतीत्यर्थः ८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शून्यादृष्टिर्वृथाचेष्टाविकलानींद्रियाणिच ॥ नस्पृहा नविरक्तिर्वाक्षीणसंसारसागरे ९ ॥

शून्येति ॥ क्षीणःसंसारसागरो यस्य तस्मिन् क्षीणसंसार सागरेषु रुषेस्पृहा विषयेच्छापिन विरक्तिर्वाविषयविरक्तिश्चन । तस्यमनः कार्येन्द्रियव्यापारोव्यालोन्मत्तादिवदित्याह ॥शून्येति॥ तस्यदृष्टिर्मनोव्यापारः शून्यः संकल्परहितः । चेष्टाकायव्यापारः वृथाफलमनुदिश्यैव तस्य इन्द्रियाणि विकलानि । पुरःस्थिता नामपि विषयाणामनिर्णायकत्वात् । तदुक्तं भगवतायस्यांजाग्र तिभूतानिसानिशा पश्यतो मुनेरिति ९ ॥

नजागर्तिननिद्रातिनोन्मीलतिनमीलति ॥ अहोपर दशाकापिवर्ततेमुक्तचेतसः १० ॥

नजागर्तीति ॥ ज्ञानी न जागर्ति जाग्रदवस्थावान् न भवति अत्रचबहिर्विषयाननुसन्धानादिहेतुमाह ॥ नोन्मीलतीति ॥ बा ह्यविषयान् नानुसंधत इत्यर्थः ॥ तथा ज्ञानीननिद्राति यतः न निमिलति । जडोन्मत्तवत् अन्यथा सर्वान् विषयान् ब्रह्मत्वेनप श्यतीत्यर्थः । कातर्हितस्यदशेत्यआह ॥ अहोइति ॥ आश्चर्ये मुक्तचेतसः कापि अलौकिकी परदशा उत्कृष्टावस्था तुरीया तीतेत्यर्थः १० ॥

सर्वत्रदृश्यतेस्वस्थःसर्वत्रविमलाशयः ॥ समस्तवा सनोन्मुक्तोमुक्तःसर्वत्रराजते ११ ॥

इदमेवविशदयति ॥ सर्वत्रेति ॥ सर्वत्रसुखेदुःखेचस्वस्थचि त्तः । तथा सर्वत्र शत्रौमित्रेचविमलाशयः समानदर्शीयतः सम स्तविषयवासनाभ्योमुक्तः अतएव मुक्तः सर्वत्र सर्वासु दशासु राजते दीप्यते पूर्णात्मदर्शित्वात् ११ ॥

पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गृह्णन्वदन्व्रज न् ॥ ईहितानीहितैर्मुक्तोमुक्तएवमहाशयः १२ ॥

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पश्यन्निति ॥ आरब्धवशाद्दर्शनादिकं बहिरिन्द्रिय व्यापारं कुर्वन्नपिईहितानि हितैरिच्छाद्वेषैर्मुक्तो महाशयो आत्मनि अशयो यस्यसमहाशय मुक्तएव मनोविकारातीतत्वात् १२ ॥

ननिंदतिनचस्तौतिनहृष्यतिनकुप्यति ॥ नददाति नगृह्णातिमुक्तःसर्वत्रनीरसः १३ ॥

इदमेव विशदयति ननिंदतीति स्पष्टम् १३ ॥

सानुरागांस्त्रियंदृष्ट्वामृत्युंवासमुपस्थितम् ॥ अविह्वलमनाःस्वस्थमुक्तएवमहाशयः १४ ॥

किंच ॥ सानुरागामिति ॥ सानुरागास्त्रियंदृष्ट्वा अथवा समुपस्थितं मृत्युंदृष्ट्वा अविह्वलमनाः कामभयाभ्यां विमुक्तमना महाशयो मुक्तएव १४ ॥

सुखेदुःखेनरेनार्य्यांसंपत्सुचविपत्सुच ॥ विशेषोनैव धीरस्यसर्वत्रसमदर्शिनः १५ ॥

किंच सुखेति ॥ स्पष्टम् १५ ॥

नहिंसानैवकारुण्यं नैद्रूत्यन्नचदीनता ॥ नाश्चर्यन्नैव चक्षोभः क्षीणसंसरणेऽनरे १६ ॥

किञ्च ॥ नाहिंसेति ॥ क्षीणसंसरणे अनरेनराभिमानरहिते विदुषिहिंसानामपरद्रोहइत्यादयो मनोविकारानभवंतीत्यर्थः१६॥

नमुक्तोविषयद्वेष्टा नवाविषयलोलुपः ॥ असंसक्तमनानित्यं प्राप्तंप्राप्तंमुपाश्नुते १७ ॥

नमुक्तइति ॥ जीवन्मुक्तः विषयदेष्टापिना नवाविषयलोलुपः किं तर्हिअसंसक्तमनाःसन् प्रारब्धवशात् प्राप्तंप्राप्तं उपाश्नुते भुंक्तेइत्यर्थः १७ ॥

साधानासमाधान हिताहितविकल्पनाः ॥ शून्यचित्तोनजानाति कैवल्यमिवसंस्थितः १८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समाधानेति ॥ बहिंशून्यचित्तोज्ञानी समाधानादि विविधाः कल्पनाः जानाति उत्प्रेक्षतेपि देहेकैवल्यंप्राप्तइव १८ ॥

निर्ममोनिरहङ्कारो नकिञ्चिदितिनिश्चितः ॥ अन्तर्गलितसर्वाशः कुर्वन्नपिनलिप्यते १९ ॥

निर्ममइति ॥ अहं ममाभिमानशून्यस्तथाधिष्ठानातिरिक्तं किञ्चित् नसदितिनिश्चयवान् अतएव अन्तर्गलितसर्वाशः अत एवकुर्वन्नपि नकरोति कर्तृत्वाभिमानरहितत्वादित्यर्थः १९ ॥

मनःप्रकाशसंमोह स्वप्नजाड्यविवर्जितः ॥ दशांकामपिसंप्राप्तो भवेद्गलितमानसः २० ॥

इतितत्त्वज्ञस्वरूपविंशतिकम् ॥

मनइति ॥ गलितं सविशेषवृत्तिविहीनं मानसंसज्ञानीकाम पि अनिर्वाच्यांदशां संप्राप्तोभवेत् तदेवदर्शयति ॥ मनइति ॥ मनः प्रकाशविवर्जितः सविशेषप्रकाशाभावात् तथा संमोहवर्जितः प्रत्यक्प्रवणचित्तत्वात् अतएव स्वप्नविवर्जितो जाड्येन सुषुप्त्यावा विवर्जितः २० ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायांतत्त्वज्ञस्वरूपविंशतिकंसमाप्तम् ॥

यस्यबोधोदयेतावान्स्वप्नवद्भवतिभ्रमः ॥ तस्मैसुखैकरूपाय नमःशान्तायतेजसे १ ॥

तत्त्वाभिज्ञेफलीभूत शमस्यैवप्रधानतां व्याख्यातुंवर्ण्यतेशान्तिः शतश्लोकैःपुनःस्फुटम् तत्रतावच्छांतेः प्रधानतेति ख्यापयितुं फलीभूतांशान्तिं वर्णयितुकामः शान्तिशालिनं नमस्करोति ॥ यस्येति ॥ बोधोदयेसति तावत् तत्क्षणमेवप्रपञ्चभ्रमः स्वप्नवत् तुच्छायस्यभवति ज्ञातोभवति तस्मैशान्ताय निवृत्तसङ्कल्पविकल्पाय अतएव सुखैकरूपाय दुःखोऽननुविद्धसुखस्वभावाय अतएव तेजसेस्वप्रकाशाय विदुषेनमः १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्ज्जयित्वाखिलानर्थान् भोगानाप्नोतिपुष्कलान् ॥ नहिसर्वपरित्यागमन्तरेणसुखीभवेत् २ ॥

ननु धनिनोपिसुखिनोदृश्यते तत्कथं शान्तसङ्कल्पएव सुखैकरूपइत्याशंक्याह ॥ अर्ज्जयित्वेति ॥ अखिलानर्थान् धनधान्यकान्तादीनर्ज्जयित्वा पुष्कलान् बहुविधान् भोगानेवआप्नोति नतु सुखैकरूपस्तत्क्षयेदुःखभागित्वात् सर्वपरित्यागमन्तरेण सर्वसङ्कल्पत्यागं विनासुखीसुखैकरूपोनहिभवेत् नैवस्यात् ननु सङ्कल्पविकल्पयोस्तु त्यागस्तुत्यागस्तुच्छत्व ज्ञानमेव त्यागमात्रस्य यथावन्ध्यापुत्रेतुच्छत्व ज्ञानमेवत्यागः असतस्त्यागासंभवात् इदमेवरूपकालङ्कारेणविशदयति २ ॥

कर्त्तव्यदुःखमार्त्तण्ड ज्वालादग्धान्तरात्मनः ॥ कुतः प्रशमपीयूष धारासारमृतेसुखम् ३ ॥

कर्त्तव्यमिति ॥ कर्त्तव्यानि यानिकर्माणि तज्जातानि दुःखान्येव मार्तण्डज्वालाखरतरसूर्यतापस्तेनदग्धः अन्तरात्मामनोयस्य सङ्कल्पप्रशमामृतधारा लक्षणंआसारं विनासुखंकुतःस्यात् ३ ॥

भवोयंभवनामात्रोनकिञ्चित्परमार्थतः ॥ नास्त्यभावःस्वभावानां भावाभावविभाविनाम् ४ ॥

संकल्पप्रशमस्यामृतत्वं संसाररूपविषनिवर्त्तकत्वादित्याशयेनाह ॥ भवोयमिति ॥ अयंभवः भावनामात्रः संकल्पमात्रप्रभवः परमार्थत आत्मव्यतिरिक्तं किंचिन्नास्ति परमार्थतस्तु आत्मैव भावरूपः ननु अभावोरूपोपिप्रपंचः कालादिवशाद्भावस्वभावइत्याशंक्याह ॥ नास्तीति ॥ भावाभावेषु विभाविनांस्थितानां अभावोनास्ति नहि उष्णस्वभावोवह्निः कदाचिदपि शीतलस्वभावोदृष्टः तथाच मनोराज्यवद्भावनामात्रसिद्धोऽसत्स्वभावः प्रपंचोभावनानिवृत्तो निवर्त्ततइति संकल्पप्रशमः संसारविषतापापहृदात्मामृतप्राप्तिहेतुत्वादमृतमितिभावः । ननु संकल्पो परममात्रेण कथमात्मामृतप्राप्तिरित्याशंक्य तस्य नित्यप्राप्तत्वमाह ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नदूरंनचसङ्कोचाल्लब्धमेवात्मनःपदम् ॥ निर्विकल्पंनिरायासं निर्विकारंनिरञ्जन ५ ॥

नदूरमिति ॥ आत्मनः पदंस्वरूपं दूरंनास्ति नापि संकोचाद्वर्ततेपरिच्छिन्नंनास्ति परिपूर्णत्वात् अतएवात्मनः पदं नित्यं लब्धं प्राप्तमेवास्ति संकल्पवशात् पुनरप्राप्तमिवाविद्वांसो मन्यंते कंठगत चामीकरवत् कीदृशंपदं निर्विकल्पं विकल्पातीतं विकल्पाभावगम्यं वा तथा निरायासं । आयासातीतं तदभावगम्यं वा निर्विकारं विकारातीतं निरंजनं उपाधि मलशून्यम् ५ ॥

व्यामोहमात्रविरतौ स्वरूपादानमात्रतः ॥ वीतशोकाविराजन्ते निरावरणदृष्टयः ६ ॥

कथं तर्हितत्त्वज्ञानेन तत्प्राप्तिव्यवहारः शास्त्रकाराणामित्याशंक्य भ्रान्तिनाशमात्रादेवेत्याह ॥ व्यामोहेति ॥ ज्ञानेन निरावरणदृष्टयः अविद्याऽनावृत्तदृष्टयः व्यामोहमात्रस्य प्रपञ्चभ्रान्तिमात्रस्य विरतौसत्यां स्वरूपादानमात्रतः आत्मविभ्रान्तिमात्रतोवीतशोकाविराजन्ते सर्वदास्वभावेनैव पूर्णाऽद्वितीयतया प्रकाशन्त इत्यर्थः ६ ॥

समस्तङ्कल्पनामात्रमात्मामुक्तःसनातनः ॥ इतिविज्ञायधीरोहि किमभ्यस्यतिबालवत् ७ ॥

आत्मज्ञानरस्यमाह ॥ समस्तमिति ॥ स्पष्टार्थमिदम् ७ ॥

आत्माब्रह्मेतिनिश्चित्य भावाभावौचकल्पितौ ॥ निष्कामःकिंविजानाति किंब्रूतेचकरोतिकिम् ८ ॥

समस्तंकल्पनामात्रमिति ॥ ज्ञानस्य निदानभूतं तत्त्वं पदार्थैक्यमाह ॥ आत्मेति ॥ आत्मात्वंपदार्थः ब्रह्मतत्पदार्थाभिन्नइति निश्चित्य अधिष्ठानसाक्षात्काराच्च भावाभावौघटादि तदभावौकल्पितावितिनिश्चित्य तथाच सर्वस्य तुच्छत्वानुसन्धानात्कामहेत्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्याविलयाच्चनिष्कामः सन् किंविशिष्टतया जानाति किंब्रूते किञ्चकार्यङ्करोति कर्त्तृत्वाभिमानरहितत्वात् ज्ञातापि नवक्तापि नक्रियाकर्त्तापिनेत्यर्थः ८ ॥

अहंसोहमयंनाहमितिक्षीणाविकल्पनाः ॥ सर्वमात्मेतिनिश्चित्यतूष्णींभूतस्ययोगिनः ९ ॥

सर्वमात्मेति ज्ञानं सर्वकल्पनानिवर्त्तकमित्याह ॥ अहमिति ॥ सर्वमात्मेति निश्चित्य अनुभूयतूष्णींभूतस्य निवृत्तपरवाग्व्यापारस्य पुंसइति विविधाः कल्पनाः क्षीणाभवन्ति इतीति किं अहङ्करोमि एवाहं पूर्वदिनेव्रतमकार्षंसोहं यजामि अयंदेवदत्तोगच्छति नाहं गमिष्यामीत्यादयः कल्पनाः क्षीणाभवन्तीत्यर्थः ९ ॥

नविक्षेपोनचैकाग्र्यं नातिबोधोनमूढता ॥ नसुखन्नच वादुःखमुपशान्तस्ययोगिनः १० ॥

निवृत्तसङ्कल्पस्य स्वरूपमाहद्वाभ्यां ॥ नविक्षेपइति ॥ उपशान्तविकल्पस्ययोगिनः विक्षेपोव्यग्रतान ऐकाग्र्यादिकमपिनेत्यर्थः १०

स्वराज्येभैक्ष्यवृत्तौच लाभेलाभेजनेवने ॥ निर्विकल्पस्वभावस्य नविशेषोस्तियोगिनः ११ ॥

स्वराज्यइति ॥ स्वराज्येस्वर्गेराज्येभैक्ष्यवृत्तौचपरार्द्धवस्तुलाभेतदलाभेजनेवनेवनेच विशेषोयोगिनोनास्ति कीदृशस्य निर्विकल्पस्य विकल्परहितस्वभावस्येत्यर्थः ११ ॥

क्वधर्मक्वचवाकामः क्वचार्थःक्वविवेकता ॥ इदंकृतमिदंनेति द्वन्द्वैर्मुक्तस्ययोगिनः १२ ॥

किञ्च ॥ क्वधर्मइति ॥ इदंकृतमिदन्नकृतमित्यादि द्वन्द्वैर्मुक्तस्य योगिनः धर्मार्थकामाः विवेकतामोक्षोपायभूतो विवेकश्चनभवति तन्मूलभूताविद्याकामसङ्कल्पादीनां विनाशादित्यर्थः १२ ॥

कृत्यङ्किमपिनैवास्ति नक्वापिहृदिरञ्जना ॥ यथाजीवनमेवेह जीवन्मुक्तस्ययोगिनः १३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथं तर्हि जीवन्मुक्तस्य लोके क्रियेशक्यजीवनाऽदृष्टावशादेवेत्यह ॥ कृत्यमिति ॥ जीवन्मुक्तस्ययोगिनः सङ्कल्पवशात्किमपिकृतं नास्ति तथा हृदिमनसिकापिरञ्जनाकोपिअनुरागोनास्ति तद्धेतुभूताऽविद्यायाअभावात् तथापि अस्य कृत्यञ्जीवनञ्जीवनाऽदृष्टमनतिक्रम्यभवतीत्यर्थः १३ ॥

क्वमोहःक्वचवाविश्वं क्वतद्ध्यानंक्वमुक्तता ॥ सर्वसङ्कल्पसीमायां विश्रान्तस्यमहात्मनः १४ ॥

क्वमोहइति ॥ सङ्कल्पसीमायामात्मबुद्धौविश्रान्तस्य मोहादिकं क्वभवति किङ्कारणमाश्रित्यभवति न किमपिकारणमाश्रित्यभवति आत्मबुद्ध्याकारणोपमर्द्दादित्यर्थः १४ ॥

येनविश्वमिदंदृष्टं सनास्तीतिकरोतुवै ॥ निर्वासनः किंकुरुते पश्यन्नपिनपश्यति १५ ॥

येनेति ॥ येनइदंविश्वं घटपटादिदृष्टं सतदाहितसंस्कारः कदाचित् घटादिकं नास्तीतिकरोतु वैनास्तीतिजानातु यः पश्यन्नपिन पश्यति सनिर्वासनःसन् किंकुरुते यद्विषयकः संस्कारोपिनास्ति तस्य कर्त्तुमशक्यत्वादित्यर्थः १५ ॥

येनदृष्टंपरंब्रह्मसोहंब्रह्मेतिचिन्तयेत् ॥ किञ्चितयतिनिश्चिन्तोद्वितीयंयोनपश्यति १६ ॥

येनेति ॥ येनपरंव्यतिरिक्तंब्रह्म दृष्टं सअहंब्रह्मेतिचिन्तयेत् यस्तुद्वितीयन्नपश्यति सनिश्चिन्तः सर्वचिन्तारहितः सन् किञ्चिन्तयति न किमपि चिन्तयति अद्वितीयात्मानुभवशाकिनि ब्रह्मचिन्तनमपि नास्तीत्यर्थः १६ ॥

दृष्टोयेनात्मविक्षेपोनिरोधंकुरुतेत्वसौ ॥ उदारस्तुनविक्षिप्तःसाध्याभावात्करोतिकिम् १७ ॥

ज्ञानिनश्चित्तानिरोधोपिनास्तीत्याह ॥ दृष्टइति ॥ येन आत्मविक्षेपश्चित्तादि भ्रमोदृष्टः असौ पुरुषश्चित्तानिरोधंकुरुते विक्षेप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परिहारार्थंउदारः सर्वत्राद्वितीयात्मदर्शीतु विक्षिप्तएवनास्ति सविक्षेपपरिहारलक्षणस्य साध्यस्याभावात्किंकुरुते कथं निरोधंकुरुते इत्यर्थः १७ ॥

धीरोलोकाविपर्यस्तोवर्त्तमानोपिलोकवत् ॥ नसमाधिंनविक्षेपंनक्तेयंस्वस्यपश्यति १८ ॥

इदमेवविवृणोति ॥ धीरइति ॥ धीरः अद्वितीयात्मविश्रान्तः लोकाऽविपर्यस्तः लोकेषुविक्षेपरहितः प्रारब्धवशात् लोकवत् बर्त्तमानोपिबाधितानुवृत्त्या व्यवहारपरोपिसन् अयंसमाधिरयंविक्षेपस्तथा अयंविक्षेपकृतोलोप आत्मनइत्यादिकन्नपश्यति चिन्मात्रदर्शित्वात् १८ ॥

भावाभावविहीनोयस्तृप्तोनिर्वासनोवुधः ॥ नैवकिंचित्कृतंतेनलोकदृष्ट्यापिकुर्वता १९ ॥

भावाभावेति ॥ बुधस्तृप्तः स्वात्मानुभवतृप्तः अतएव भावाभावस्फुर्तिविहीनः अतएव निर्वासनस्तेन लोकदृष्ट्याकुर्वतापि किञ्चिदपि नैवकृतंस्यात् अकर्त्रात्मज्ञानेन कर्तृत्वाध्यासबाधादित्यर्थः १९

प्रवृत्तौवानिवृत्तौवानैवधीरस्यदुर्ग्रहः ॥ यदायत्कर्त्तुमायातितत्कृत्वातिष्ठतःसुखम् २० ॥

इदमेव विशदयति ॥ प्रवृत्तौवेति ॥ धीरस्यात्म विश्रान्तस्य प्रवृत्तौवा निवृत्तौवा दुर्ग्रहः कर्तृत्वाभिमानोनास्ति कीदृशस्य धीरस्य प्रारब्धवशाद्यदायत्प्रवृत्तौवा निवृत्तौवा कर्त्तुमायाति तत्सुखमनायासं यथास्यात्तथा कृत्वा तिष्ठतः अतः कर्तृत्वाभिमानाभावात् ज्ञानिनाकृतमकृतमेवेत्यर्थः २० ॥

निर्वासनोनिरालम्बःस्वच्छंदोमुक्तबन्धनः ॥ क्षिप्तःसंस्कारवातेनचेष्टतेशुष्कपर्णवत् २१ ॥

ननु ज्ञानीचेन्निर्वासनस्तर्हिकेन प्रयुक्तः कर्मकरोतीत्याशंक्याह ॥ निर्वासनइति ॥ निर्वासनः अतएव निरालंबः कर्त्तव्या क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्तव्यानुसंधानरहितः अतएव स्वच्छन्दः रागद्वेषाऽनुधीनः यतो मुक्तबन्धनः बन्धहेत्वज्ञानशून्यः ज्ञानीसंस्कारवातेनाक्षिप्तः प्रारब्ध पवनेनप्रेरितः सन् शुष्कपर्णवत् चेष्टते २१ ॥

असंसारस्यतुक्वापिनहर्षोनविषादता ॥ सशीतलम नानित्यंविदेहइवराजते २२ ॥

संसारसंकल्पादि शून्यस्तु सर्वदा संतुष्टएवेत्याह ॥ असंसार स्येति ॥ न विद्यते संसारहेतुः संकल्पो यस्य तस्य असंसारस्य हर्षादिका ऊर्मयो न जायन्ते अत ऊर्मिरहितत्वान्नित्यं शीतलम नाविदेहः मुक्तएव राजते षडूर्मिरहितः शिवइतिस्मृते २२ ॥

कुत्रापिनजिहासास्तिनाशोवापिचकुत्रचित् ॥ आ त्मारामस्यधीरस्यशीतलाच्छतरात्मनः २३ ॥

किंच ॥ कुत्रापीति ॥ आत्मारामस्य अतएव धीरस्य निश्चल चित्तस्य अतएव शीतलः अच्छतरः निर्मतरः आत्मामनो यस्य तस्य शीतलाच्छतरात्मनः ज्ञानिनः कुत्रापि जिहासात्यागेच्छाना स्ति उपादिक्षापिनास्ति रागद्वेषाभावात् । नाशोपि अनर्थोपि कुत्रचित् नास्ति अनर्थहेतोरज्ञानस्याभावादित्यर्थः २३ ॥

प्रकृत्याशून्यचित्तस्यकुर्वतोस्ययदृच्छया ॥ प्राकृतस्ये वधीरस्यनमानोनावमानता २४ ॥

प्रकृतेति ॥ प्रकृत्यास्वभावेन शून्यं विकाररहितं चित्तं यस्य तस्य धीरस्य आत्मविश्रान्तस्य प्राकृतस्येव अज्ञामिन इव यदृच्छ या प्रारब्धवशात्कुर्वतः अस्य विदुषः मानावमानानुसन्धानं नास्तीत्यर्थः २४ ॥

कृतंदेहेनकर्मेदंनमयाशुद्धरूपिणा ॥ इतिचिन्तानुरो धीयःकुर्वन्नपिकरोतिन २५ ॥

कृतंदेहेनेति ॥ इति चिन्तां अनुरुध्यते निरन्तरं श्रयति सकु र्वन्नपि न करोति कर्तृत्वाभिमानाभावादित्यर्थः २५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अतद्वादीचकुरुतेनभवेदपिबालिशः ॥ जीवन्मुक्तः सुखीश्रीमान्संसारन्नपिशोभते २६ ॥

अतद्वादीति ॥ जीवन्मुक्तः अतद्वादीच अहमिदं करिष्यामी त्यवदन्नकार्यं कुरुते प्रारब्धवशात् । अवदन्नपि बालिशो मूर्खो न भवेत् अन्तर्ज्ञानित्वात् । अतएव संसरन्नपि संसारव्यवहारं कुर्वन्नपि अन्तरसुखी अतएव श्रीमान् प्रसन्नतया शोभावान् अतएव शोभते दीव्यते स्वप्रकाश इत्यर्थः २६ ॥

नानाविचारसुश्रांतो धीरोविश्रांतिमागतः ॥ नकल्पतेनजानाति नशृणोतिनपश्यति २७ ॥

नानेति ॥ नानाविचारात् द्वैतविचारात् सुश्रांतइव निवृत्तो यतोधीरो ज्ञानीअतएव आत्मन्येव विश्रांतिमागतः अतएवनकल्पते संकल्पादिकं मनो व्यापारं नकरोति नजानाति शुद्धिव्यापारं नकरोति शब्दंनशृणोति रूपंनपश्यति इंद्रियमात्रव्यापारं नकरोति कर्तृत्वाभिमानाभावादित्यर्थः२७ ॥

असमाधेरविक्षेपान्नमुमुक्षुर्नचेतरः ॥ निश्चित्यकल्पितंपश्यन् ब्रह्मैवास्तेमहाशयः २८ ॥

असमाधेरिति ॥ ज्ञानीमुमुक्षुर्नभवति असमाधेः समाधेरकरणात् तथा इतरोबद्धोन अविक्षेपात् द्वैतभ्रमाभावादित्यर्थः कीदृशस्तर्हिज्ञानी त्याशंक्याह ॥ निश्चित्येति ॥ इदंसर्वंकल्पितमिति पूर्वमेवनिश्चित्य पश्चाद्बाधितानुवृत्त्यापश्यन्नपि महाशयोनिर्विकारचित्तः अतएवब्रह्मैवआस्ते २८ ॥

यस्यांतःस्यादहंकारो नकरोतिकरोतिसः ॥ निरहंकारधीरेण नकिंचिदकृतंकृतम् २९ ॥

ननुसंसारंपश्यंश्चेत्कथं ब्रह्मेत्याशंक्याहंकाराभावादित्याह ॥ यस्येति ॥ यस्यांतःकरणेहंकाराध्यासःस्यात् सन्नोक दृष्ट्यानकुर्वन्नपि संकल्पादिकं करोति कर्तृत्वाध्यासात् निरहंकारेण अतएव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धीरेण कर्तृत्वाध्यासरहितेन यद्यपि लोकदृष्ट्याकृतं तथापि स्वदृष्ट्यानकिंचिदपिकृतं कर्तृत्वाध्यासाभावादित्यर्थः २९ ॥

नोद्विग्नंनचसंतुष्टमकर्तृस्पंदवर्जितं ॥ निराशंगतसंदेहं चित्तंमुक्तस्यराजते ३० ॥

मुक्तस्यचित्तंवर्णयतिद्वाभ्यां ॥ नोद्विग्नमिति ॥ मुक्तस्यचित्तंराजते केवलप्रकाशरूपमेव यतोनोद्विग्नं उद्वेगहेतोर्द्वेषस्याभावात् नचसंतुष्टंसंतोष हेत्वनुरागाभावात् तथा अकर्तृ तथा स्पंदवर्जितां संकल्पशून्यं अतएवनिरासंगताः संदेहाद्यस्मात्तत्गतसंदेहंसंदेहतोरज्ञानस्यनष्टत्वादित्यर्थः ३० ॥

निर्ध्यातुंचक्षितुंवापि यच्चित्तंनप्रवर्त्तते ॥ निर्निमित्तमिदंकिंतु निर्ध्यायतिविचेष्टितम् ३१ ॥

निर्ध्यातुमिति ॥ यस्यज्ञानिनश्चित्तं निर्ध्यातुंनिष्क्रियत्वेन स्थातुंचेष्टितुंचेष्टां कर्तुंवापिनप्रवर्त्तते न संकल्पयति किंतुइदंज्ञानिचित्तं निर्निमित्तं संकल्परहितमेवसत् निर्ध्यायिति निश्चलंस्वरूपेतिष्ठति तथाविचेष्टते विविधांचेष्टां करोतीत्यर्थः ३१ ॥

तत्त्वंयथार्थमाकर्ण्य मंदःप्राप्नोतिमूढतां ॥ अथवायातिसंकोचममूढःकोपिमूढवत् ३२ ॥

ज्ञान्यज्ञानिनोनिर्विशेषंवदन्नेवज्ञानिनो विरलत्वमाह ॥ तत्त्वमिति ॥ मंदःअज्ञानीयथार्थं तत्त्वं तत्त्वं पदार्थाभेदं श्रुतेराकर्ण्यअसंभावना विपरीतभावनाभ्यां मूढतां अविवेकंप्राप्नोति अथवा शास्त्रार्थसाक्षात्कारायसंकोचं चित्तंसमाधिंआयाति कोपिसहस्रेष्वेकअंतरसंमूढोपिबाह्यगत्यामूढवत् बहिर्व्यवहारकर्त्ता भवति ३२ ॥

एकाग्रतानिरोधोवा मूढैरभ्यस्यतेभृशम् ॥ धीराःकृत्यन्नपश्यन्ति सुप्तवत्त्वपदेस्थिताः ३३ ॥

अथवायातिसङ्कोचमित्यनेनोक्तावेकाग्रतानिरोधौदूषयति ॥ एकाग्रतेति ॥ एकाग्रता एकलक्ष्यनिष्ठचित्तता अथवानिरोधश्चित्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विलयो मूढैरनुत्पन्नात्मसाक्षात्कारैर्विपरीतभावनानिवृत्त्यर्थं भृशमत्यर्थमभ्यस्यते सुप्तवत् सुषुप्तवत् देहात्मधीराहित्येन स्वपदेस्वस्वरूपेस्थिताधीरा ज्ञानिनस्तु प्रागुक्तं किमपिकृतन्नपश्यन्ति अद्वैतानन्दात्मसाक्षात्कारेणौ वा नानन्दादिभ्रमस्य दूराऽपास्तत्त्वादित्यर्थः ३३ ॥

अप्रयत्नाप्रयत्नाद्वा मूढोनाप्नोतिनिर्वृतिम् ॥ तत्त्वनिश्चयमात्रेण प्राज्ञोभवतिनिर्वृतः ३४ ॥

निरोधस्याऽकिञ्चित्करतामाह ॥ अप्रयत्नादिति ॥ मूढः पुरुषः अप्रयत्नाच्चित्तनिरोधात्प्रयत्नात्कर्मानुष्ठानाद्वा निर्वृतिंपरमंसुखंन प्राप्नोति आनन्दहेतोरात्मानंदानुभावाऽभावादित्यर्थः प्राज्ञस्तु समाधिंवाकर्मवाप्यकुर्वन् तत्त्वनिश्चयमात्रेण कृतार्थोभवति दुःखहेतोरज्ञानदग्धत्वादित्यर्थः ३४ ॥

शुद्धंबुद्धंप्रियंपूर्णं निष्प्रपञ्चनिरामयं ॥ आत्मानन्तन्नजानन्ति तत्राभ्यासपराजडा ३५ ॥

ननुयोगाभ्यासादात्मानुभवो भविष्यतीत्याशंक्यनेत्याह ॥ शुद्धमिति॥ तत्रजगति अभ्यासपराजडा अज्ञानिन आत्मानं नजानन्ति कीदृशं शुद्धमायामलातीतं अतएव बुद्धंस्वप्रकाशंप्रियं सुखस्वरूपं पूर्णं यतो निष्प्रपञ्चं अतएव निरामयं दुःखसन्धरहितं ३५ ॥

नाप्नोतिकर्मणामोक्षं विमूढोभ्यासरूपिणा ॥ धन्योविज्ञानमात्रेण मुक्तःतिष्ठत्यविक्रियः ३६ ॥

इदमेवविवृणोति ॥ नाप्नोतीति ॥ विमूढोनात्मज्ञः अभ्यासरूपिणायोगाभ्यासात्मकेन कर्मणामोक्षंनाप्नोति नकर्मणानप्रजयानधननेतिश्रुतेः धन्योभाग्यवान् विरलो ज्ञानमात्रेणाविक्रियो निरस्ताऽविद्याकामकार्माऽतएव मुक्तस्तिष्ठति ३६ ॥

मूढोनाप्नोतितद्ब्रह्म यतोभवितुमिच्छति॥ अनिच्छन्नपिधीरोहि परब्रह्मस्वरूपभाक् ३७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुमुक्षुरपि मूढोब्रह्मनाप्नोतीत्याह ॥ मूढइति ॥ मूढः अज्ञानी यतश्चित्तनिरोधादेर्ब्रह्मभवितुमिच्छति ततोब्रह्मनाप्नोति हिनि श्चितंधीरो ज्ञानीअनिच्छन्नपि मोक्षमनिच्छन्नपि परब्रह्मस्वरूप भाक् व्यवधायकाऽज्ञानस्य निवृत्तत्वादित्यर्थः ३७ ॥

निराधाराग्रहव्याग्रा मूढाःसंसारपोषकाः ॥ एतस्या नर्थमूलस्य मूलच्छेदःकृतोबुधैः ३८ ॥

एतदेवस्पष्टयति ॥ निराधारेति ॥ मूढाःऽअज्ञानिनस्तु निराधारा ग्रहव्यग्राः केवलेन चित्तनिरोधेनैवाहं मोक्ष्यामीति निष्कारणा दुराग्रहव्यग्राः प्रत्युतसंसारपोषकाः संसारनिवर्त्तक ज्ञानपराङ्मु खत्वात् बुधैर्ज्ञानिभिः अनर्थमूलस्य एतस्य संसारस्य मूलच्छेदः कृतः संसारमूलभूतस्याऽज्ञानस्य ज्ञानेननिवृत्तत्वादित्यर्थः ३८ ॥

नशान्तिलभतेमूढो यतःशमितिमिच्छति ॥ धीरस्त त्त्वंविनिश्चित्य सर्वदाशान्तमानसः ३९ ॥

किञ्च ॥ नशान्तिमिति ॥ मूढः अज्ञानीयतश्चित्त निरोधादेः शमिच्छति ततःशान्तिन्नलभते धीरोविवेकीतत्त्वं विनिश्चित्यश मितुमनिच्छन्नपि स्वभावादेवसर्वदाशान्तमानसोभवति चेतोवि कारहेतोरज्ञानस्य निवृत्तत्वादित्यर्थः ३९ ॥

क्वात्मनोदर्शनन्तस्य यदृष्टमवलंबते ॥ धीरास्तन्तन्न पश्यन्ति पश्यन्त्यात्मानमव्ययम् ४० ॥

किञ्च ॥ क्वात्मनइति ॥ यदृष्टज्ञानं अवलम्बते दृश्यं विषयीक रोति तस्य आत्मनोदर्शनंक्वनक्वापीत्यर्थः धीराज्ञानिनस्तन्तं ति मिरप्रदीपनादादिकं दृश्य पदार्थन्नपश्यन्ति किन्तु चिद्रूपमात्मानं पश्यन्ति ४० ॥

क्वनिरोधोविमूढस्य योनिर्बन्धङ्करोतिवै ॥ स्वरामस्यै वधीरस्य सर्वदासाचकृत्रिमः ४१ ॥

क्वेति ॥ यः अज्ञानी शुष्कचित्त निरोधेनिर्बंधङ्करोति तस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विमूढस्यक्वचितनिरोधःनक्वापिअज्ञानिनां समाध्युपरमेपुनश्चित्त प्रसरात् स्वारामस्य आत्मारामस्यैव अतएव निश्चलचित्तस्य स र्वदा असौचित्तनिरोधः अकृत्रिमः स्वाभाविकः सर्वदास्वात्मानुभव शालित्वात् ४१ ॥

भावस्यभावकःकश्चिन्नकिञ्चिद्भावकोपरः ॥ उभया ऽभावकःकश्चिद्देवमेवनिराकुलः ४२ ॥

किञ्च ॥ भावस्येति ॥ कश्चित्तार्किकादिः भावस्यभावकः भा वरूपः परमार्थः सन् प्रपञ्चइति भावयति मन्यते इतिभावकः अपरः शून्यवादीबौद्धः नाकिञ्चिदस्तीतिभावयतीति नाकिञ्चिद्भाव कः कश्चित्सहस्रेष्वेक एव कश्चिदात्मानुभवशली उभयाऽभाव कः सन् एवमेव उभयाऽभावनेनैव निराकुलः स्वस्थचित्त आस्ते इत्यर्थः ४२ ॥

शुद्धमद्वयमात्मानं भावयन्तिकुबुद्धयः ॥ नतुजानंति संमोहाद्यावज्जीवमनिर्वृताः ४३ ॥

नकिञ्चिदपि चिन्तयेदिति भगवद्वचनंसिद्धान्तमभिप्रेत्याह ॥ शुद्धमिति ॥ कुबुद्धयोमूढबुद्धयएव शुद्धंनिर्मलंअद्वयन्द्वैववर्जितं आत्मानं अततनशीलं व्यापकंभावयन्ति चिन्तयंति नतुजानन्ति साक्षात्कुर्वन्ति कुतः संमोहात् निर्मलत्वस्य कल्पितमलसापेक्ष त्वादद्वयस्य कल्पितद्वैतसापेक्षत्वात् आत्मत्वस्यच कल्पिताऽना त्मसापेक्षत्वात् सापेक्षरूप चिन्तनेनतुमोहानिवृत्तेः यतोनजान न्ति अतएव यावज्जीवमनिर्वृताः परमसंतोषस्य ज्ञानैक लभ्य त्वादित्यर्थः ४३ ॥

मुमुक्षोर्बुद्धिरालंबमन्तरेणनविद्यते ॥ निरालम्बैवनि ष्कामा बुद्धिर्मुक्तस्यसर्वदा ४४ ॥

इदमेवविशदयति ॥ मुमुक्षोरिति ॥ मुमुक्षोरनधिगतात्मसा क्षात्कारस्यबुद्धिः सविशेषाद्यालंबनमन्तरेणनविद्यते साक्षात्कारा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावात् मुक्तस्य जीवन्मुक्तस्य अतएव मुक्तावपि निष्कामाबुद्धिः सर्वदानिरालंबैव निर्विशेषात्मानुभवरूपैव सविशेषादिपरित्याग एवात्मानुभवः ४४ ॥

विषयद्वीपिनोवीक्ष्य चकिताःशरणार्थिनः ॥ विशन्ति झटितिक्रोडन्निरोधैकाग्र्यसिद्धयो ४५ ॥

निरोधोपि विषयस्फूर्त्तिचकितैरेवानुष्ठीयते नतुविज्ञैरित्याह ॥ विषयेति॥ विषयद्वीपिनोविषयव्याघ्रान् विक्ष्यशार्दूलद्वीविनौ व्याघ्रइत्यमरः भीताः शरणार्थिनः स्वात्मरक्षणार्थिनो मूढाएव निरोधसिद्धये एकलक्ष्यवृत्तिसिद्धये वा झटिति शीघ्रंक्रोडंकन्दरान्तः प्रदेशंविशन्ति नतुज्ञानिनइत्यर्थः ४५ ॥

निर्वासनंहरिंदृष्ट्वातूष्णींविषयदंतिनः ॥ पलायन्तेन शक्तास्तेसेवन्तेकृतचाटवः ४६ ॥

वासनात्यागएव विषय भयनिवृत्तिहेतुरित्याह। निर्वासनोयः पुरुषस्तल्लक्षणं हरिं सिंहं दृष्ट्वा विषयदन्तिनो ऽशक्ताः संतः तूष्णीं मौनं यथास्यात्तथा पलायंते कृतचाटवः कृतप्रिय वचनाइव तं निर्वासन ईश्वरा रुष्टाः स्वयमागत्य सेवन्ते इत्यर्थः ४६ ॥

नमुक्तिकारिकान्धत्तेनिःशंकोयुक्तमानसः ॥ पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्मास्तेयथासुखम् ४७ ॥

नमुक्तीति ॥ निःशंकोगत संशयः अतएव मुक्तमानसो निश्चल मानसः ज्ञानी मुक्तिकारिकां यमनियमादि क्रियां आग्रहान्नधत्ते किंतर्हि कर्तृत्वाध्यासरहितत्वात् यथा सुखं आत्मसुखं अनतिक्रम्य लोकदृष्ट्या ईक्षणादि क्रियां कुर्वन्नास्ते इत्यर्थः ४७ ॥

वस्तुश्रवणमात्रेणशुद्धबुद्धिर्निराकुलः ॥ नैवाचारमनाचारमौदास्यंवाप्रपश्यति ४८ ॥

वस्त्विति ॥ वस्तुनश्चिदात्मनः श्रवणमात्रेण जाताया शुद्ध

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बुद्धिः अखण्डात्मसाक्षात्कारस्ततो निराकुलः स्वस्वरूपस्थः पुरुषः आचारं क्रियानुष्ठानं अनाचारं नैष्कर्म्यं उभयत्रापि ताटस्थ्यं वा एतत्त्रयमपि नैवप्रपश्यति आत्मत्वादित्यर्थः ४८ ॥

यदायत्कर्त्तुमायाति तदातत्कुरुतेऋजुः ॥ शुभंचाप्यशुभंवापि तस्यचेष्टाहिबालवत् ४९ ॥

यदेति ॥ यदा यत्नैष्कर्म्यं शुभं वा अशुभं कर्म वा कर्त्तुमायाति तत् लोकदृष्ट्या प्रारब्धवशात् कुरुते ऋजुराग्रहरहितः । हि यतः कारणात् तस्य चेष्टानात्मवत् प्रारब्धमात्रा यत्ता रागद्वेषानधीना ४९ ॥

स्वातंत्र्यान्सुखमाप्नोति स्वातंत्र्याल्लभतेपरम् ॥ स्वातंत्र्यान्निर्वृतिंगच्छेत् स्वातंत्र्यात्परमंपदम् ५० ॥

स्वातंत्र्यादिति ॥ स्वातंत्र्या द्रागद्वेषानधीनत्वात् सुखंमनः प्रसादमाप्नोति यतः स्वातंत्र्यात्परंज्ञानं प्राप्नोति । तथा स्वातंत्र्यान्निर्वृतिं नित्यसुखं गच्छेत्प्राप्नुयात् अतएव स्वातंत्र्यात्परमंपदं स्वरूप विश्रांतिं गच्छेत् ५० ॥

अकर्त्तृत्वमभोक्तृत्वं स्वात्मनोमन्यतेयदा ॥ तदाक्षीणाभवंत्येव समस्ताश्चित्तवृत्तयः ५१ ॥

अकर्तृत्वमिति ॥ यदा स्वात्मनः अकर्तृत्वं मन्यते तदा समस्ताश्चित्तवृत्तयः क्षीणाभवंत्येव अमुकं कर्माहं करिष्यामि अमुकं मेभोग्यं भवत्वित्यादि चित्तवृत्त्यनुदये तज्जन्यां नामन्यासामपि चित्तवृत्तीनामनुदयादित्यर्थः ५१ ॥

उच्छृंखलाप्यकृतका स्थितिर्धीरस्यराजते ॥ नतुसंस्पृहचित्तस्य शांतिर्मूढस्यकृत्रिमा ५२ ॥

उच्छृंखलेति ॥ धीरस्य वीतस्पृहस्य अकृतका अकृत्रिमा उच्छृंखलापि शांतिरहितापिस्थितिःशोभते । सस्पृहाचित्तस्यमूढस्य तु कृत्रिमाशांतिर्नशोभत इत्यर्थः ५२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विलसंतिमहाभोगैर्विशंतिगिरिगह्वरान् ॥ निरस्त कल्पनाधीरा अबद्धामुक्तबुद्धयः ५३ ॥

निरस्त कल्पनानां ज्ञानिनांतु भोगतच्छान्त्योरप्यनाग्रहइत्याह ॥ विलसंतीति निरस्तकल्पनाधीरा ज्ञानिनः कदाचित् प्रारब्धवशात् महाभोगैर्विलसन्ति क्रीडंति कदाचित् प्रालब्धवशात् गिरिगह्वरान् पर्वत वनानि विशंति कीदृशाः अबद्धा आसक्ति रहिताः यतो मुक्तबुद्धयः कर्तृत्वाध्यासरहित बुद्धयइत्यर्थः ५३ ॥

श्रोत्रियंदेवतांतीर्थं मंगनंभूपतिंप्रियं ॥ दृष्ट्वासंपूज्य धीरस्य नकापिहृदिवासना ५४ ॥

श्रोत्रियमिति ॥ धीरस्य ज्ञानिनः श्रोत्रिय देवतादि पूजनेसति हृदिकापि वासना धर्मार्थ काम वासना न जायते तथा अंगनां भूपतिप्रियं पुत्रादिकंच दृष्ट्वाकापि काम्यपदार्थ वासना न जायते सर्वत्र समबुद्धित्वादित्यर्थः ५४ ॥

भृत्यैःपुत्रैःकलत्रैश्च दुर्वृत्तैश्चापिगोत्रजैः ॥ विहस्य धिक्कृतोयोगी नायातिविकृतिमनाक् ५५ ॥

भृत्यैरिति ॥ भृत्यादिभिर्विहस्य उपहस्याधिक् तस्तिरस्कृतोपि योगीमनाक् किंचिदपि विकृतिं चित्तक्षोभं नायाति रागद्वेष हेतोर्मोहस्याभावादित्यर्थः ५५ ॥

सन्तुष्टोपिनसन्तुष्टः खिन्नोपिनचखिद्यते ॥ तस्याश्चर्यदशान्तां तादृशाएवजानते ५६ ॥

किञ्च ॥ सन्तुष्टइति ॥ लोकदृष्ट्यासन्तोषादियुक्तोपि वस्तुगत्यानंदरहितोतस्तस्य ज्ञानिनस्तां तामाश्चर्यदशां तादृशाएव ज्ञानिनएवजानते ५६ ॥

कर्त्तव्यैतवसंसारो नतापशान्तिसूरयः ॥ शून्याकार निराकार निर्विकारानिरामयाः ५७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किञ्च ॥ कर्त्तव्यतैवेति ॥ कर्त्तव्यतैवममेदङ्कर्त्तव्यमिति कार्य सङ्कल्पएव संसारस्तद्धेतुत्वात् सूरयोज्ञानिनस्ताङ्कर्त्तव्यतां नप श्यन्ति न सङ्कल्पयन्ति सङ्कल्पमात्ररहितत्वात् कीदृशाः सूरयः शून्ये सर्वकार्यक्षये तथा वर्त्तमानघटाद्याकारे तथा निराकारेआव्यकृते निर्विकारः समात्मदर्शिनः अतएव निरामयाः सङ्कल्पोपक्क वरहिताइत्यर्थः ५७ ॥

अकुर्वन्नपिसंक्षोभाद्व्यग्रःसर्वत्रमूढधीः ॥ कुर्वन्नपितु कृत्यानि कुशलोहिनिराकुलः ५८ ॥

किञ्च ॥ अकुर्वन्नपीति ॥ अकुर्वन्नपिमूढधीः सर्वत्रशून्याकार निराकारेषु संक्षोभात्सङ्कल्पाद्व्यग्रोभवति लोकदृष्ट्याकृत्यानि कुर्वन्नपि कुशलोविद्वान् हिनिश्चितन्निराकुलः निश्चलचित्तः आत्मारामत्वात् ५८ ॥

सुखमास्तेसुखंशेते सुखमायातियातिच ॥ सुखंवक्ति सुखंभुंक्ते व्यवहारेपिशान्तधीः ५९ ॥

सुखमिति ॥ प्राक्तनवशाद्व्यवहारेपि जायमाने शान्तधीरात्म निष्टबुद्धिर्विद्वान् आत्मसुखमनतिक्रम्यैव आस्तेउपविशति शेतेआ गच्छति गच्छाति वक्तिभुङ्क्ते सर्वेन्द्रियव्यापारंकुरुतइत्यर्थः ५९ ॥

स्वभावाद्यस्यनैवार्तिर्लोकवद्व्यवहारिणः ॥ महाह्र दइवाक्षोभ्यो गतक्लेशःसुशोभते ६० ॥

ननुज्ञानिनोपि व्यवहारेषुकथं नखेदइत्यतआह ॥ स्वभावा दिति ॥ व्यवहारिणोपि यस्य ज्ञानिनः लोकवत् प्राकृतजनवत् आर्तिः खेदोनजायते कुतः स्वभावात् साक्षात् कृतानन्दस्य स्व भावात्सामर्थ्यादित्यर्थः सगतक्लेशोज्ञानी महाह्रदइवाक्षोभ्यो निर्विकारः सुशोभते ६० ॥

निवृत्तिरपिमूढस्य प्रवृत्तिरुपिजायते ॥ प्रवृत्तिरपिधी रस्य निवृत्तिफलभागिनी ६१ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निवृत्तिरिति ॥ लोकदृष्ट्याप्रतीयमानापि मूढस्य बाह्येन्द्रिय व्यापाणांनिवृत्तिः प्रवृत्तिस्वरूपैवजायते अहङ्कारादीनामनिवृत्त त्वात् धीरस्यज्ञानिनः लोकदृष्ट्याप्रारब्धवशात्प्रतीयमानापि प्रवृ त्तिरपि निवृत्तिफलभागिनी मुक्तिपर्यवसायिनीस्यात् अहङ्कारो मीत्यभिमानाभावादित्यर्थः ६१ ॥

परिग्रहेषुवैराग्यंप्रायोमूढस्यदृश्यते ॥ देहेविगलिता शस्य क्वरागःक्वविरागता ६२ ॥

परिग्रहेष्विति ॥ मूढस्य देहाभिमानिनस्तत्सम्बन्धितयापरिगृ हीतेषु परिग्रहेषु धनवेश्मादिषु प्रायोबाहुल्येन वैराग्यंदृश्यते दे हे विगलिताशस्य तत्सम्बन्धिनि कुत्रगृहादौरागःस्यात् क्वचशत्रुव्या घ्रादौविरागः स्यात् देहेरागविरागयोरभावे तत्सम्बन्धिषु रागवि रागयोर्वक्तुमशक्यत्वात् ६२ ॥

भावनाऽभावनासक्ता दृष्टिर्मूढस्यसर्वदा ॥ भाव्यभा वनयासातु स्वस्थस्यादृष्टिरूपिणी ६३ ॥

भावनेति ॥ मूढस्यदृष्टिः सर्वदा भावनायां अभावनायां वा आसक्ता अहंभावनाङ्करोमि यद्वाअहमभावनाङ्करोमीत्यहङ्कारात् स्वस्थस्या त्मनिष्टस्यतु सादृष्टिः भाव्यभावनयादृश्य चित्तयाउ पलक्षितापि अदृष्टिरूपिणी दृश्यदर्शनरहितरूपैवस्यात् अहङ्का रोमीत्यभिमानाभावादित्यर्थः ६३ ॥

सर्वारंभेषुनिष्कामो यश्चरेद्बालवन्मुनिः ॥ नलेपस्त स्यशुद्धस्य क्रियमाणेपिकर्मणि ६४ ॥

ननु दृश्यभाक्ने क्रियमाणेपि न दृष्टिः कथं दृश्यानालं वि नीत्याशंक्य निष्कामत्वादित्याह ॥ सर्वारंभेष्विति ॥ यो बालवत् निष्कामः सन् प्राक्तनवशात्सर्वारम्भेषु चरति प्रवर्त्तते तस्य शु द्धस्याहंकारमलवर्जितस्य कर्मणि क्रियमाणेन लेपो न कर्तृता स्यादहंकाराभावादित्यर्थः ६४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सएवधन्यआत्मज्ञः सर्वभावेषुयःसमः ॥ पश्यन्शृ
ण्वन्स्पृशन्जिघ्रन्नश्नन्निस्तर्षमानसः ६५ ॥

एवं विधोऽविधन्यः इत्याह ॥ सएवेति ॥ स आत्मज्ञ एव ध
न्यो नान्यः यः सर्वभावेषु समात्म बुद्धिरत एव निस्तर्षमानसो
वितृष्णुचित्तो भवति किंकुर्वन् पश्यन् शृण्वन् स्पृशन् जिघ्रन्
अश्नन् ६५ ॥

क्वसंसारःक्वाभासः क्वसाध्यंक्वचसाधनम् ॥ आका
शस्येवधीरस्य निर्विकल्पस्यसर्वदा ६६ ॥

तस्यैवधन्यत्वेयुक्तिमाह ॥ क्वेति ॥ धीरस्य ज्ञानिन अत
एव सर्वदा विकल्परहितस्य संसारप्रपंचः क्वअतएव तत्प्रति
भासश्च क्वअतएव साध्यं स्वर्गादिकं क्वअतएव साधनं याणादि
कंचक्व ६६ ॥

सजयत्यर्थसंन्यासी पूर्णस्वरसविग्रहः ॥ अकृत्रिमो
ऽनवच्छिन्ने समाधिर्यस्यवर्त्तते ६७ ॥

सजयतीति स अर्थ संन्यासी दृष्टादृष्टप्रयोजन शून्योयतः
पूर्णस्वर सः पूर्णभावो विग्रहः स्वरूपं यस्य सपूर्णस्वरस विग्रहो
जयति सर्वोत्कर्षेण वर्तते । सकः यस्य अकृत्रिमः स्वाभाविकः
अनवच्छिन्ने पूर्णस्वरूपे समाधि रनवच्छिन्ने समाधिर्यस्य वर्तते
सजयतीत्यर्थः ६७ ॥

बहुनात्रकिमुक्तेन ज्ञाततत्त्वोमहाशयः ॥ भोगमोक्ष
निराकांक्षी सदासर्वत्रनीरसः ६८ ॥

ज्ञाततत्त्वस्यतु सर्वत्रनिराकांक्षत्वमेव मुख्यं लक्षणमित्याह ॥
बहुनेति ॥ अत्र ज्ञानिनि बहुनोक्तेन लक्षणेन किंप्रयोजनं ॥ ज्ञा
ततत्त्वोमहाशयः भोगमोक्षयोः फलयोर्निराकांक्षी अतएव सदा
सर्वत्र भोग मोक्षसाधनेषु नीरसः निरनुरागः ६८ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महदादिजगद्द्वैतं नाममात्रविजृंभितम् ॥ विहाय शुद्धबोधस्य किंकृत्यमवशिष्यते ६९ ॥

किंच ॥ महदादीति ॥ महदादि महदहंकार पंचतन्मात्रा पंच महाभूत भौतिक जयलक्षणं द्वैतं नाममात्रेणैव विजृंभितं विभिन्नं भातं नतु वास्तवं अतएव तत्र कल्पनां विहाय स्थितस्य अतएव शुद्धबोधस्य स्वप्रकाशं चिन्मात्रस्वरूपस्य किंकृत्यमवशिष्यते । सच्चिदानन्दाधिगमेनैव कृतकृत्यत्वादितिभावः ६९ ॥

भ्रमभूतमिदंसर्वं किंचिन्नास्तीतिनिश्चयी ॥ अलक्ष्य स्फुरणःशुद्धः स्वभावेनैवशाम्यति ७० ॥

ननु तथापि अनर्थशान्त्यर्थं प्रयत्नःकर्त्तव्य इत्यतआह ॥ भ्रमभूतमिति ॥ अधिष्ठान साक्षात्कारेसति इदं सर्वं भ्रमभूतं भ्रमेणैव कल्पितं अतएव इदं किंचित्किमपि वास्तवं नास्तीति निश्चयी अलक्ष्य स्फुरण चिन्मात्र प्रतिभासवान् अतएव शुद्धः स्वरूप साक्षात्कारेण बाधिताऽध्यस्तमलत्वात् स्वभावेनैव शांतो नतु शान्त्यर्थं ज्ञानारिक्तमपेक्ष्यमित्यर्थः ७० ॥

शुद्धस्फुरणरूपस्य दृश्यभावमपश्यतः ॥ क्वविधिःक्व चवैराग्यं क्वत्यागःक्वशमोपिवा ७१ ॥

किंच ॥ शुद्धेति ॥ शुद्धस्फुरणरूपस्य प्रकाशचिद्रूपस्य अतएव दृश्यपदार्थमपश्यतः क्वकुत्रकर्मणिविधिः क्वकेषु वा विषयेषु वैराग्यं क्वकेषु वा पदार्थेषु त्यागः क्वकेभ्यः पदार्थेभ्यः शमोपिवा कार्यः दृश्यपदार्थस्यैवास्फुरणादित्यर्थः ७१ ॥

स्फुरतोनंतरूपेण प्रकृतिंचनपश्यतः ॥ क्वबंधःक्व चवामोक्षःक्वहर्षःक्वविषादता: ७२ ॥

चिद्रूपेण प्रकाशमानस्य बंधादिकं नास्तीत्यर्थः ७२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बुद्धिपर्यंतसंसारेमायामात्रंविवर्त्तते ॥ निर्ममोनिरहंकारोनिष्कामःशोभतेबुधः ७३ ॥

किञ्च ॥ बुद्धीति ॥ बुद्धिरात्मज्ञानमेव पर्यन्तोनाशोयस्य तस्मिन् संसारेमायामात्रं मायाशबलितश्चैतन्यंविवर्त्तते अतात्विकंजगदाकारंप्राप्नोति अतो बुद्धोविद्वानतात्विके शरीरेनिरहङ्कारस्तत्सम्बन्धिनि कलत्रादौनिर्ममः अतएव निष्कामः अतएव शोभते दीप्यते कामनाऽनावृतत्वात् ७३ ॥

अक्षयंगतसंतापमात्मानंपश्यतोमुनेः ॥ क्वविद्याक्वचवाविश्वंक्वदेहोहंममेतिवा ७४ ॥

अक्षयमिति ॥ अक्षयं अविनाशिनं अतएव संतापरहितं आत्मनं पश्यतोमुनेः क्वविद्या क्वशास्त्राणीत्यर्थः ॥ क्वचवाविश्वंक्वचदेहः अहंममेति वाक्व । आत्मातिरिक्तस्य विद्याविश्वादेरस्फुरणादित्यर्थः ७४ ॥

निरोधादीनिकर्माणिजहातिजडधीर्यदि ॥ मनोरथान्प्रलापांश्चकर्त्तुमाप्नोत्यतःक्षणात् ७५ ॥

आत्मज्ञस्य द्वैतानर्थ निवृत्तिरित्युक्तं अज्ञस्यतु चित्तनिरोधादीन्यपि कर्माणि कुजरशौच प्रायाणीत्याह ॥ निरोधादीनीति ॥ यत् यदि जडधीः चित्त निरोधादीनि जहाति तर्हिअतःक्षणात् अस्मादेवक्षणादारभ्य मनोरथान् प्रलापान् लक्षणया सर्वव्यापारान् कर्त्तुमाप्नोति प्रवर्त्तते तथाच मूढस्य चित्तनिरोधादिकमपि किंचित्करमित्यर्थः ७५ ॥

मन्दश्रुत्वापितद्वस्तुनजहातिविमूढतां ॥ निर्विकल्पोबहिर्यत्नादन्तर्विषयलालसः ७६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मूढस्यात्मश्रवणमप्यनर्थकमित्याह ॥ मन्द इति ॥ मन्दो मूर्खस्तत् आत्मवस्तु श्रुत्वापि मूढतां न जहाति मलिनचित्तस्य श्रवणादपि ज्ञानाऽनुदयात् अतएव मूढः यत्नात् बहिर्दृष्ट्या निर्विकल्पोपि अन्तर्मनसि विषयलोलुपो भवतीत्यर्थः ७६ ॥

ज्ञानाद्गलितकर्मायोलोकदृष्ट्यापिकर्मकृत् ॥ नाप्नोत्यवसरंकर्त्तुंवक्तुमेवनकिंचन ७७ ॥

ज्ञानितु लोकदृष्ट्या कर्मकुर्वाणोप्यकर्त्तैवेत्याह ॥ ज्ञानादिति ॥ यः ज्ञानाद्गलित कर्म्मागलित क्रियाध्यासः सलोकदृष्ट्या कर्मकृदपि किंचन कर्त्तुवक्तुमेव अवसरंनाप्नोति ॥ अहं कर्मकरिष्यामीति वक्तुमपि अवसरं नाप्नोति कर्मावसस्तु दुरापस्त इति भावः ७७ ॥

क्वतमःक्वप्रकाशोवाहानंक्वचनकिंचन ॥ निर्विकारस्य धीरस्यनिरातंकस्यसर्वदा ७८ ॥

विद्वांस्तुतमः प्रकाशादिकंनपश्यतीत्याह ॥ क्वेति ॥ धीरस्य ज्ञानिनः अतएव निर्विकारस्य निरस्त मोहादि विकारस्य तमः क्वतमसोऽभावेच तन्निरूप्यः प्रकाशोचा क्वनिरातकस्य कालादि भय शून्यस्य हानं क्वचन कुत्रेत्यर्थः अनुरागादि शून्यत्वाच्च किंचन किमपि आदानादि कर्मापि क्वचन कुत्रापीत्यर्थः ७८ ॥

क्वधैर्यंक्वविवेकत्वंक्वनिरातंकतापिवा ॥ अनिर्वाच्यस्वभावस्यनिःस्वभावस्ययोगिनः ७९

ज्ञानीत्वनिर्वाच्य स्वभावइत्याह ॥ क्वधैर्यमिति ॥ योगिनः ज्ञानिनः अतएव निःस्वभावस्य अतएव अनिर्वाच्य स्वभावस्य धैर्यंक्वविवेकत्वंच क्वनिरातंकता निर्भयतापि क्वेत्यर्थः ७९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नस्वर्गोनैवनरकोजीवन्मुक्तिर्नचैवहि ॥ बहुनात्रकि मुक्तेनयोगदृष्ट्यानकिंचन ८० ॥

ज्ञानदृष्ट्यातु स्वर्ग नरक मोक्षादिकं किंचिदपि नास्तीत्याह न स्वर्ग इति सुगमः श्लोकः ८० ॥

नैवप्रार्थयतेलाभंनालाभेनानुशोचति ॥ धीरस्यशीतलंचित्तममृतेनैवपूरितम् ८१ ॥

ज्ञानिनश्चित्तंतु प्रार्थनानुतापादि विकाररहितत्वादमृतेनैव परमानंदेनैव पूरितमित्याह ॥ नैवेति ॥ लाभं न प्रार्थयते अलाभेन सुवर्णाद्यलाभेतन्नानुशोचति ॥ अतएव धीरस्य चित्तं अमृतेनैव परमानंदेनैव पूरितं सत् शीतलं आध्यात्मिकादि ताप रहितमित्यर्थः ८१ ॥

नशान्तंस्तौतिनिष्कामोनदुष्टमपिविंदति ॥ समदुःखसुखस्तृप्तःकिंचित्कृत्यंनपश्यति ८२ ॥

उक्तप्रायमेवार्थंपुनःपुनर्भङ्गिविशेषेण वर्णयति ज्ञानिदशायाः सर्वोत्कृष्टत्वख्यापनाय ॥ नशान्तमिति ॥ निष्कामोऽविद्या कामकर्महीनो ज्ञानीशान्तंशान्त्यादि सत्त्वगुणयुक्तंनस्तौति नापिदुष्टं निन्दति तृप्तःसन् समदुःखंसुखोभवति निष्कामत्वात्किञ्चित्कृत्यन्नपश्यति ८२ ॥

धीरोनद्वेष्टिसंसारमात्मानंनदिदृक्षति ॥ हर्षमर्षविनिर्मुक्तोनमृतोनचजीवति ८३ ॥

धीरइति ॥ धीरोज्ञानीसंसारं नद्वेष्टि संसारांऽदर्शित्वाद्बाधितानुसन्धानाद्वा तथा आत्मानंनदिदृक्षति अवाप्त साक्षात्कारत्वात् अतएव हर्षामर्षविनिर्मुक्तस्तथा जीवनमरणादिरहितः सदैकरूपत्वादित्यर्थः ८३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निःस्नेहःपुत्रदारादौनिष्कामोविषयेषुच ॥ निश्चिन्तःस्वशरीरेपिनिराशःशोभतेबुधः ८४ ॥

निःस्नेहइति ॥ निराशोबुधःशोभतेदीप्यते किंदृशः पुत्रदारादौ निःस्नेहः प्रीतिरहितः विषयेषु निष्कामः भोगेच्छारहितः स्वशरीरेपि भोजनादिचिन्तारहितः ८४ ॥

तुष्टिःसर्वत्रधीरस्ययथाऽपतितवर्तिनः ॥ स्वच्छंदंचरतोदेशान्यत्रास्तमितशायिनः ८५ ॥

तुष्टिरिति ॥ धीरस्यज्ञानिनः यथा पतितेन यथा प्राप्तेनवर्त्तते तिष्ठतीति तस्य यथा पतितवर्त्तिनः सर्वत्रप्रारब्धप्राप्तेसद्वस्तुन्यऽसद्वस्तुनि चतुष्टिरात्मतोष एव तथा स्वच्छन्दं अवपेक्षितं प्रारब्धवशात् नानादेशान् विचरतः यत्रवने वा नगरे वा सूर्योस्त मितस्तत्रैवशायिनः शयनंकुर्वतः ८५ ॥

पतत्वद्रेतुवादेहोनास्यचिन्तामहात्मनः ॥ स्वभावभूमिविश्रांतिविस्मृताशेषसंसृतेः ८६ ॥

पतत्विति ॥ देहःपततुम्रियतावा अथवा उदेतु जीवतुवाउभयथापि अस्य ज्ञानिनश्चिन्तानभवति कीदृशस्य स्वभावो नाम निजात्मस्वरूपं सएव भूमिस्तत्र विश्रान्त्या विस्मृतसमस्तसंसारस्य ८६ ॥

अकिंचनःकामचारोनिर्द्वंद्वश्छिन्नसंशयः ॥ असक्तःसर्वभावेषुकेवलोरमतेबुधः ८७ ॥

किञ्च ॥ अकिञ्चनइति ॥ केवलोनिर्विकारोबुधोरमते कीदृशः अकिञ्चनः नास्ति किञ्चन परिगृहीतं यस्यसः अकिञ्चनः अतएव कामचारः विधिनिषेधाऽकिङ्करः स्वच्छंदचारि अतएव निर्द्वन्द्वःसुख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुःखादि शून्यछिन्नसंशयः अद्वैत संशयशून्यः सर्वेषु भावेषु विषयेषु असक्तः आसंगशून्यः ८७ ॥

निर्ममःशोभतेधीरःसमलोष्ठाश्मकाचनः ॥ सुभिन्नहृदयग्रन्थिर्विनिर्द्धूतरजस्तमाः ८८ ॥

निर्ममइति ॥ धीरोज्ञानी शोभतेदीप्यते यातोनिर्ममः अतएव समलोष्ठाश्मकाचनः ज्ञानंबलेन सुभिन्नोहृदयग्रन्थिरहङ्कारो यस्यसःतथा निर्द्धूतेरजस्तमसी यस्यसः ८८ ॥

सर्वत्रानवधानस्यनाकिंचिद्वाचिनोहृदि ॥ मुक्तात्मनोवितृप्तस्यतुलनाकेनजायते ८९ ॥

सर्वत्रेति ॥ सर्वत्र सर्वेषु विषयेषु अनवधानस्य एकाग्रतारहितस्य तथा न किञ्चिद्वाचिनः हृदिमुक्तात्मनः कर्त्तृत्वाध्यासरहितात्मनः अत एवात्मानन्देन विशेषतस्तृप्तस्य केनतुलनाजायते ज्ञानीव्यतिरिक्तस्य ईदृशस्माभावादित्यर्थः ८९॥

जानन्नपिनजानातिपश्यन्नपिनपश्यति ॥ ब्रुवन्नपिनचब्रूतेकोन्योनिर्वासनादृते ९० ॥

अतुलनामेवविशदयेति ॥ जानन्निति ॥ निर्वासनात् ज्ञानिनऋतेअन्यः कोलोकदृष्ट्वामनसाजानन्नपि वस्तुतोनजानाति तथा चक्षुषापश्यन्नपि वस्तुतोनपश्यति ब्रुवन्नपिनब्रूते कर्त्तृत्वाभिमानभावादित्यर्थः ९० ॥

भिक्षुर्वाभूपतिर्वापियोनिष्कामःसशोभते ॥ भावेषुगलितायस्यशोभनाऽशोभनामतिः ९१ ॥

भिक्षुरिति ॥ यस्यज्ञानिनः उत्कृष्टेषु भावेषु शोभना अपकृष्टेषु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशोभनत्वावगाहिनीमतिर्गलिता अतएव योनिष्कामः सभूप तिर्वाजनकादिवत् भिक्षुर्वायाज्ञवल्क्यादिवत् शोभतएव भावेषु निर्विकल्पत्वाद्राज्यं तस्य नबन्धायेत्यर्थः ९१ ॥

क्वस्वाच्छंद्यंक्वसंकोचःक्वातत्त्वविनिश्चयः ॥ निर्व्या जार्ज्जवभूतस्यचरितार्थस्ययोगिनः ९२ ॥

क्वेति ॥ योगिनाआत्म निष्ठस्वचरितार्थस्य अन्वर्थनाम्नः स्वा च्छद्यंस्वेच्छयाचारित्वं क्वतथासंकोचः प्रकृत्यादिसंवरणं क्वतत्त्ववि निश्चयः कर्त्तृत्वंवाक्वकर्त्तृत्वाध्यासाभावात् अतएवनिर्व्याजं यदा र्जवंचक्रबुद्ध्यभवस्तद्रूपस्य ९२ ॥

आत्मविश्रांतितृप्तेनानिराशेनगतार्त्तिना ॥ अन्तर्य दनुभूयेततत्कथंकस्यकथ्यते ९३ ॥

आत्मेति ॥ आत्मनिविश्रांत्यास्थित्यातृप्तेन अतएवआशारहि तेन अतएवगतार्त्तिनागतदुःखेन ज्ञानिनायदंतःकरणे ऽनुभूयेतत त्कथंतंप्रकारं धर्ममाश्रित्यकथ्यते प्रकारस्यैवधर्मस्थाभावात् कस्य वाअधिकारिणः कथ्यतेताशाधिकारिणोऽभावात् ९३ ॥

सुप्तापिनसुषुप्तौचस्वप्नेपिशायितोनच ॥ जागरेपिन जागर्तिधीरस्तृप्तःपदेपदे ९४ ॥

सुप्तइति ॥ धीरःसुषुप्तौनसुप्तः स्वप्नेपिशायितोनाजा गरेपिनजा गर्त्तिअवस्थावतीया बुद्धिस्तद्विविक्तात्मज्ञत्वात् इदमेवाभिप्रेत्याह पदेपदे क्षणेक्षणेअविरतं नित्यानन्दानुभवत्तृप्तः ९४ ॥

ज्ञःसचिन्तोपिनिश्चिंतः सेंद्रियोपिनिरिंद्रियः ॥ सबु द्धिरपिनिर्बुद्धिः साहंकारोनहंकृतिः ९५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

- इइति ॥ ज्ञानीलोकदृष्ट्या चिंतादिसहितोपिवस्तुतस्तद्रहितः विविक्तात्मदर्शित्वात् ९५ ॥

नसुखीनचवादुःखी नविरक्तोनरागवान् ॥ नमुमुक्षुर्नवामुक्तोनाकिंचिन्नचाकिंचन ९६ ॥

नसुखीति ॥ लोकगत्यासुखीत्यादि रूपोपिवस्तुतस्तद्रहितः अंतःकरणाध्यासरहितत्वात् न विरक्तो विषयद्वेषाभावात् नवामुक्तःपूर्वमपि बंधनाऽभावात् तथाअकिंचनः सदैकरूपत्वात् तथा किंचनकिंचिदपि नचअनिर्वाच्यत्वात् ९६ ॥

विक्षेपेपिनविक्षिप्तः समाधौनसमाधिमान् ॥ जाड्येपिनजडोधन्यः पांडित्येपिनपंडितः ९७ ॥

विक्षेपेपीति ॥ धन्योज्ञानीलोकदृष्ट्या विक्षेपेपिवस्तुतोनविक्षिप्तः स्वप्रकाशात्मानुभावात् लोकदृष्ट्यासमाधौ प्रतीयमानेपि नसमाधिमान्समाधि कर्तृत्वाध्यासाभावात् लोकदृष्ट्याजाड्ये प्रतीयमानेपिनजडः स्वानुभवशालित्वात् लोकदृष्ट्यापांडित्ये प्रतीयमानोपिनपांडित्ये प्रतीयमानोपिनपंडितः पंडितोहमित्यभिप्रायाभावात् ९७ ॥

मुक्तोयथास्थितिस्वस्थः कृतकर्त्तव्यनिर्वृतः ॥ समःसर्वत्रवैतृष्ट्यान्नस्मरत्यकृतंकृतम् ९८ ॥

मुक्तइति ॥ मुक्तःप्रारब्धवशाद्यःयाप्राप्तस्थितौसत्यामपि स्वस्थचित्तः तथाकृतेपूर्वकृते कर्त्तव्येचकरिष्यमानेकर्मणि निर्वृतः संतुष्टः अभि निवेशोद्वेगेशून्यः अतएवसर्वत्रसमः वैतृष्ट्यात्इदमकृतं इदंचकृतमितिनस्मरति ९८ ॥

नप्रीयतेवंद्यमानो निंद्यमानोनकुप्यति ॥ नैवोद्विजनिमरणे जीवनेनाऽभिनंदति ९९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नप्रीयतइति ॥ कैश्चित्स्वस्मिन् वंद्यमानोनतुष्यति निंद्य मानोनकुप्यति मरणेउपस्थितेसति उद्वेगंनप्राप्नोति आत्मनोनित्यत्वानुसंधानात् अतएवजीवनेसति नाभिनंदतिनतुष्यति ९९ ॥

नधावतिजनाकीर्णे नारण्यमुपशांतधीः ॥ यथातथा यत्रतत्र समएवावतिष्ठते १०० ॥

इतिश्रीअष्टावक्रेशांतिशतकंसंपूर्णम् ॥

नधावतीति ॥ उपशांतधीपुरुषः जनाकीर्णप्रदेशंनानुधावति नाप्यरण्यसर्वत्रशांतत्वात् यथातथाजनसंमर्देन तदसंमर्दप्रकारेणवा यत्रतत्रवनेवापत्तनेवास एवस्वस्थचित्त एवावतिष्ठतेप्राप्तात्मसाक्षात्कारत्वात् १०० ॥

इतिश्रीविश्वेश्वरविरचितायामष्टावक्रटीकायां शांतिशतकंप्रकरणम् ॥

तत्त्वविज्ञानसंदेशमादायहृदयोदरात् ॥ नानाविधपरामर्शशल्योद्धारःकृतोमया १ ॥

साध्यसाधनरूपेण ज्ञातेज्ञानेगुरोर्मुखात् । शिष्यःस्वात्मनि विश्रांतिमष्टभिः प्राहसस्फुटम् ॥ एवं तत्त्वज्ञानिनः स्वभाव भूतां शान्तिं श्रुत्वास्वकृतार्थं तया गुरुं परितोषयितुमात्मविश्रांन्त्यष्टकं शिष्यः स्वयमाह ॥ तत्त्वेति ॥ हेगुरो मयाभवतः सकाशात् तत्त्वविज्ञानोपदेशमादाय स्वहृदयोदरात् नानाविधपरामर्श एव यथाल्पं तस्य उद्धारः अपहारः कृतः १ ॥

क्वधर्मःक्वचवाकामःक्वचार्थःक्वविवेकिता ॥ क्वद्वैतंक्वचवाद्वैतंस्वमहिम्निस्थितस्यमे२ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदेवस्पष्टयति ॥ क्वधर्मइति ॥ धर्मार्थकामाअपि हृदयोदरा न्निरस्ताः क्षयिष्णुत्वादित्यर्थः स्वमहिम्निस्थितस्यमे ममविवेकि ताक्वद्वैतश्चाद्वैतश्च क्वचिन्मात्रविश्रान्तस्य विवेकानुपयोमात् उत्ती र्थेतुपरेपारेनैकया किंप्रयोजनमिति न्यायात् द्वैतस्यच ज्ञानबाधि तत्त्वात् अद्वैतस्य द्वैतसापेक्षत्वेना ऽस्वभाविकत्वाद्विवेकादयोपि ममनसन्तीत्यर्थः २ ॥

क्वभूतंक्वभविष्यद्वावर्त्तमानमपिक्वचा ॥ क्वदेशःक्वच वानित्यंस्वमहिम्निस्थितस्यमे ३ ॥

क्वद्वैतमित्युक्तमेवविशेषतः प्रपञ्चयति ॥ क्वभूतमिति ॥ काल स्यापि ममास्फुर्त्तेस्तदुपाधिकाभूतभविष्यद्वर्तमानाअपि नसंतीत्य र्थःनित्यंस्वमहिम्निस्थितस्य ममदेशोपिनास्तीत्यर्थः ३ ॥

क्वचात्माक्वचवानात्मक्वशुभंक्वाशुभंतथा ॥ क्वचिंता क्वचवाचिंतास्वमहिम्निस्थितस्यमे ४ ॥

अतति व्याप्नोतीत्यात्मासचव्याप्यमपेक्ष्यकथ्यते स्वमहिम्नि स्थितस्यच ममात्मादिकंनास्तीत्यर्थः ४ ॥

क्वस्वप्नःक्वसुषुप्तिर्वाक्वचजागरणंतथा ॥ क्वतुरीयमयं वापिस्वमहिम्निस्थितस्यमे ५ ॥

क्वस्वप्नइति ॥ स्वप्नादयोबुद्धेरेवावस्थास्तामममनसन्ति एतत्त्रि तयाभावे तन्निरूप्यातुरीयावस्थापि ममनास्ति तथा मायादयो प्यन्तःकरणधर्माममनसन्तीत्यर्थः ५ ॥

क्वदूरंक्वसमीपंवावाह्यंक्वाभ्यंतरंक्ववा ॥ क्वस्थूलंक्वच वासूक्ष्मंस्वमहिम्निस्थितस्यमे ६ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्वदूरमिति ॥ सर्वत्रपरिपूर्णस्य ममदूरसमीपादिकंनास्ति पूर्ण दर्शिनो ममस्थूल सूक्ष्मदृष्टिरपिनास्तीत्यर्थः ६ ॥

क्वमृत्युर्जीवितंवाक्वक्वलोकाःक्वास्यलौकिकं ॥ क्वल यःक्वसमाधिर्वास्वमहिम्निस्थितस्यमे ७ ॥

क्वमृत्युरिति ॥ कालत्रयेसद्रूपस्य ममजीविनमरणेनस्तः पूर्ण मात्रदर्शिनोस्य ममलोकाभूरादयोनसंतिलौकिकं कार्यमपिना स्ति पूर्णस्य ममलक्ष्येलयः क्वसमाधिश्चक्व ७ ॥

अलंत्रिवर्गकथया योगस्यकथयाप्यलं ॥ अलंविज्ञा नकथया विश्रान्तस्यसमात्मनि ८ ॥

इत्यात्मविश्रान्त्यष्टकम् ॥

अलमिति ॥ धर्मार्थकामकथया योगाभ्यासकथया विज्ञानक थया चालं आत्मविश्रान्तस्य ममएतैः प्रयोजनादित्यर्थः ८ ॥

इत्यात्मविश्रान्त्यष्टक् ॥

क्वभूतानिक्वदेहोवा क्वेन्द्रियाणिक्वमानसः ॥ क्वशून्यं क्वचनैराश्यंमत्स्वरूपेनिरञ्जने १ ॥

आत्मविश्रान्त्यभिव्यक्तां स्वभावमुक्तिशालिनां जीवन्मुक्तिदशां शिष्य चतुर्दशभिरब्रवीत् प्रागुक्तात्मविश्रान्तेः फलीभूतांविदुषः स्वभावभूतां जीवन्मुक्तिदशां शिष्यश्चतुर्दशश्लोकैर्निरूपयति ॥ क्वभूतानीति ॥ निरञ्जने सर्वोपाधिमलशून्ये मत्स्वरूपे भूतदेहे न्द्रियमनांसिक्व तर्हि किंशून्यमास्तेनेत्याहक्वशून्यमिति ॥ नाहि सदात्मनिसतिशून्यं सम्भवतीत्यर्थः मयिनैराश्यमयिस्वाभाविकं न आशानिरूप्यत्वादित्यर्थः १ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्वशास्त्रंक्वात्मविज्ञान क्वचानिर्विषयंमनः ॥ क्वतृप्तिः क्वचित्तृष्णुत्वं गतद्वंद्वस्यमेसदा २ ॥

क्वेति ॥ सदागतद्वंद्वस्यममशास्त्रं क्वतज्जन्यंज्ञानंच क्वआत्मविश्रांत्यासर्वस्य गलितप्रायत्वात् निर्विषयंमनोपिन तस्यापिगलितप्रायत्वात् अतएवतृप्तिरपिन तथातृप्तिसाध्यंपितृष्णु चित्तत्वमपिनचित्तस्यैव गलितप्रायत्वादित्यर्थः २ ॥

क्वाविद्याक्वचवाविद्या क्वाहंक्वेदंममक्वचा ॥ क्वबंधःक्वचवामोक्षः स्वरूपस्यक्वरूपिता ३ ॥

क्वाविद्येति ॥ मयिक्वविद्याविद्याद्यहंकारधर्माः इदंबाह्यंवस्तु ज्ञातंक्व ममसंबंधः क्वद्वितीयस्यसंबंधिनोभावात् । तथाबंधमोक्षावपिधर्मौक्व अत्रहेतुमाहस्वरूपस्येति निर्विशेषस्वरूपस्यममरूपितायर्मवार्ताक्व तथाचनिर्द्धर्म्मकेमयिना विद्यादयोधर्माः संतीति फलितार्थः ३ ॥

क्वप्रारब्धानिकर्माणि जीवन्मुक्तिरपिक्वचा ॥ क्वतद्विदेहकैवल्यंनिर्विज्ञेयस्यसर्वदा ४ ॥

क्वप्रारब्धेति ॥ प्रारब्धानिकर्माणि तथाजीवन्मुक्तिस्तथा विदेहकैवल्यमेतेधर्माः सदानिर्विषस्यमेनसंतीत्यर्थः ४ ॥

क्वकर्त्ताक्वचवाभोक्ता निष्क्रियंस्फुरणंक्वचा ॥ क्वापरोक्षंफलंवाक्व निःस्वभावस्यमेसदा ५ ॥

क्वकर्त्तेति ॥ सदानिःस्वपरावस्वमेकर्तृत्व भोक्तृत्वनिष्क्रियस्फुरणानि क्व अपरोक्षंवृत्तिरूपंचज्ञानंक्व फलंविषयावच्छिन्नं यत्फलं चैतन्यंतत्क्वेत्यर्थः ५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्वलोकाःक्वमुमुक्षुर्वा क्वयोगीज्ञानवान्क्वचा ॥ क्वबद्धः क्वचवामुक्तः स्वस्वरूपेहमद्वये ६ ॥

क्वलोकाइति ॥ अहमित्येवंरूपेऽद्वये आत्माद्वैतेस्वस्वरूपेसति लोकाः क्वमुमुक्षुक्वयोगी क्वज्ञानवान् क्वबद्धः क्वमुक्तश्चक्वेत्यर्थः ६ ॥

क्वसृष्टिःक्वचसंहारः क्वसाध्यंक्वचसाधनं ॥ क्वसाधकः क्वसिद्धिर्वा स्वस्वरूपेहमद्वये ७ ॥

क्वसृष्टिरिति ॥ अहमद्वये आत्माद्वैतेस्वस्वरूपे सतिसृष्टिसंहारौ साध्यसाधने साधकसिद्धिवाक्व ७ ॥

क्वप्रमाताप्रमाणंवा क्वप्रमेयंक्वचप्रमा ॥ क्वकिंचित्क्व नकिंचिद्वा सर्वदाविमलस्यमे ८ ॥

क्वप्रमातेति ॥ सर्वदाविमलस्योपाधि संबंधमलशून्यस्यमे प्रमातृ प्रमाण प्रमेय प्रमासंबंधःक्व ममकिंचित्सामान्यतो ऽन्यत्पदार्थमात्रक पदार्थाभावोपिमम क्व सर्वथासंबंधशून्यत्वादित्यर्थः८॥

क्वविक्षेपःक्वचैकाग्र्यं क्वनिर्बोधःक्वमूढता ॥ क्वहर्षःक्व विषादोवा सर्वदानिष्क्रियस्यमे ९ ॥

क्वविक्षेपइति ॥ सर्वदा निष्क्रियस्यमे विक्षेपादिका क्रिया क्वेत्यर्थः ९ ॥

क्वचैषव्यवहारोवा क्वचसापरमार्थता ॥ क्वसुखंक्वच वादुःखं निर्विमर्शस्यमेसदा १० ॥

क्वचैषइति ॥ सदानिर्विषस्य बिशेषज्ञानवृत्ति शून्यस्यव्यवहारः व्यावहारिक पदार्थज्ञानंक्व परमार्थताज्ञानंचक्व सुखदुःखादिक मपिक्व १० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्कमायाक्कचसंसारः क्कप्रीतिर्विरतिक्कवा ॥ क्कजीवःक्क चतद्ब्रह्म सर्वदाविमलस्यमे ११ ॥

क्कमायेति ॥ सर्वदाविमलस्य उपाधिमलशून्यस्य मममाया संसारौप्रीतिर्विरतिश्चवैराग्यंक्क जीवभावोब्रह्मभावश्चक्क कार्यो पाध्यभावे जीवत्वस्य वक्तुमशक्यत्वा द्व्याप्यवस्तुनामभावे ब्र ह्मत्वस्यच वक्तुमशक्यत्वादित्यर्थः ११

क्कप्रवृत्तिर्निवृत्तिर्वा क्कमुक्तिःक्कचबंधनं ॥ कूटस्थनि र्विभागस्य स्वस्थस्यममसर्वदा १२ ॥

क्कप्रवृत्तिरिति ॥ कूटस्थस्य निष्क्रियस्य तथानिर्विभागस्य भे दरहितस्य सर्वदास्वस्थस्य ममप्रवृत्ति निवृत्तीक्क मुक्तिबंधनेच क्केत्यर्थः १२ ॥

क्कोपदेशःक्कवाशास्त्रंक्कशिष्यःक्कचवागुरुः ॥ क्कचा स्तिपुरुषार्थेवानिरुपाधेःशिवस्यमे १३ ॥

क्कोपदेशइति ॥ निरुपाधेरुपाधि शून्यस्य तथा शिवस्य नि त्यानन्दरूपस्य उपदेशनक्रियाक्कउपदेशकं शास्त्रञ्चक्क मायाद्युपा ध्यभावे तत्कृतोपदेशस्य शास्त्रस्य चाभावात् अतएव चशिष्यः क्क गुरुश्च क्क स्वयं शिवस्वरूपस्यच पुरुषार्थोवाक्कचास्ति १३ ॥

क्कचास्तिक्कचवानास्तिक्कास्तिचैकंक्कचद्वयम् ॥ बहु नात्रकिमुक्तेनकिंचिन्नोतिष्ठतेमम १४ ॥

इतिश्रीशिष्यप्रोक्तंजीवन्मुक्तप्रकरणम् १४ ॥

जीवन्मुक्तिदशमुपसंहरति ॥ क्कचास्तीति ॥ ममअस्तीति न स्फुरतिअसत्वा पेक्षत्वा त्सत्त्वस्य तथा नास्तीत्यपि नस्फुरति सत्त्वापेक्षत्वान्नास्ति त्वस्य अतएव मिथः सेपक्षत्वादेकत्वाद्वि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वेपिममनसाः प्रत्येकंव्यक्तिभेदेन निषेधस्य कल्पकोटिभिरपि वक्तुमशक्यत्वात्सामान्यतआह ॥ बहुनेति ॥बहुनाऽक्तेन किंप्रयोजनं ममचिदेकरूपस्य किञ्चिदपिनोतिष्ठतेन प्रकाशतइत्यर्थः १४

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायांशिष्यप्रोक्तं जीवन्मुक्तचतुर्दशकंसमाप्तम् १४ ॥

एकोनविंशोपदेशेस्युःश्लोकाश्चपंचविंशतिः ॥ सत्यात्मानुभावोल्लासउपदेशेचतुर्दश १ ॥

विनयेबुद्धिसौकार्यमुद्दिश्यग्रन्थकृत्स्वयं । श्लोकसंख्यापूरकृत्य प्राहानुक्रमणीस्फुटं । एकोनविंशश्लोका गुरुणाऽउपदेशेस्युः सन्ति प्रथमप्रकरणे पञ्चविंशतिश्लोकाः शिष्योक्तानुभयोल्लासे द्वितीय प्रकरणेस्युः चतुर्दशश्लोकाष्यु नर्गुरुणाक्षिपमुद्रयोक्तोपदेशाख्ये तृतीयप्रकरणेस्युः १ ॥

षडुल्लासेलयेचैवचोपदेशेचतुश्चतुः ॥ पंचकंस्यादनुभवेबन्धमोक्षेचतुष्ककम् २ ॥

षडुल्लास इति ॥ षट्श्लोकाः शिष्योक्तानुभवोल्लासे चतुर्थ प्रकरणेस्युः चत्वारः श्लोकागुप्रोक्तेलयाख्ये पंचमप्रकरणेस्युः पुनश्चचारश्लोका गुरुप्रोक्ते प्रतिवादि सिद्धलय निषेधोपदेशाख्ये षष्ठेप्रकरणेस्युः श्लोकानां पंचकं शिष्यप्रोक्तेऽनुभवाख्ये सप्तमं प्रकरणे स्यात् श्लोकानां चतुष्कं गुरुप्रोक्ते बन्धमोक्षऽष्टमे प्रकरणेस्यात् २ ॥

निर्वेदोपशमेज्ञानएवमेवाष्टकंभवेत् ॥ यथासुखेसप्तकंचशांतौस्याद्वेदसंमिति ३ ॥

निर्वेदोपशम इति ॥ श्लोकाष्टकं गुरुप्रोक्ते निर्वेदाख्ये नवमे प्रकरणे स्यात् गुरुप्रोक्त मुपशमाष्टकंनाम दशमंप्रकरणं गुरु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रोक्तं ज्ञानाष्टकं नामैकादशं प्रकरणं शिष्यप्रोक्तमेव मेवाष्टकं नाम द्वादशंप्रकरणं शिष्यप्रोक्तं यथा सुखसप्तकंनाम त्रयोदशं प्रकरणं शिष्यप्रोक्तं शांतिचतुष्कं चतुर्दशप्रकरणम् ३ ॥

तत्त्वोपदेशोविंशच्चदशज्ञानोपदेशके ॥ तत्त्वस्वरूपे विंशच्चशमेचशतकंभवेत् ४ ॥

तत्त्वोपदेश इति ॥ विंशतिश्लोकागुरुप्रोक्ते तत्त्वोपदेशाख्ये पंचदशेप्रकरणेस्युः दशश्लोकागुरुप्रोक्ते विशेषोपदेशाख्ये षोडशे प्रकरणेस्युः विंशतिश्लोकागुरुप्रोक्तास्तत्त्वज्ञस्वरूपोपदेशाख्येस त्यदशेप्रकरणेस्युः गुरुप्रोक्तं शमशतकं नामाष्टादशंप्रकरणम् ४ ॥

अष्टाकंचात्मविश्रान्त्यौजीवन्मुक्तौचतुर्दश ॥ षट्स ख्याक्रमविज्ञानेग्रन्थैकात्म्यमतःपरम् ५ ॥

अष्टकंचेति ॥ शिष्यप्रोक्तं आत्माविश्रांत्यष्टकं नाम एकोनविं शप्रकरणम् शिष्यप्रोक्तं जीवमुन्क्त चतुर्दशकं नाम विंशतिकं प्रकरणं गुरुप्रोक्तं संख्याक्रम कथकथनंनामैक विंशंप्रकरणं अतः परं षष्ठेविंशत्येकमितिः खंडैः श्लोकैः ग्रंथैकात्म्यं संख्या ग्रन्थ खण्डानांचैकात्म्यं समूहरूपतया एकात्मत्वमित्यर्थः ५ ॥

विंशत्येकमितैःखण्डैःश्लोकैरात्माग्निमध्यखैः ॥ अ वधूतानुभूतेश्चश्लोकाःसंख्याक्रमाअमी ६ ॥

इति संख्याक्रमः ॥

विंशत्येकेति ॥ कियद्भिः खंडैर्विंशत्येकमितै एकविंशति खंडै रित्यर्थः कियद्भिः श्लोकैः आत्माग्निमध्यखैः जीवात्म परमात्म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भेदाभिन्नः आत्माद्वौ अग्निस्त्रयः मध्ये खंचमध्ये शून्यं अंकानां वामतो गतिरिति न्यायात् अन्ते द्वौमध्ये खं आदौचयम् ३०२ ॥

द्व्यधिकैस्त्रिशतश्लोकैरित्यर्थः श्लोकसंख्यादिकमुपसंहरति अवधूतेति ॥ अवधूतानुभूतिरूपा ग्रन्थस्तस्य संख्याक्रमौ विद्येते येषु ते संख्या क्रमाईदृशाः श्लोका अमकि कथित्यर्थः ॥

इतिश्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां संख्याक्रमादिकव्याख्यानंसमाप्तोयम् ॥

———*———

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

T

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri